Digitization by Arya Samaj Charitable Foundation, Chennai

रजतजयन्तीग्रन्थमाला-12

उपनिषदः

एक परिचयः

वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय-संस्कृत-संस्थानम्

Digitization by Arya Samaj Charitable Foundation, Chennai

उपनिषदमधिकृत्याधुनिक्यालोचनपद्धत्या प्रणीतोऽयं ग्रन्थः उपनिषदामभिप्रायं संख्यां रचनाकालमैतिहासिकक्रमं तत्रत्याख्यायिकानां परिचयं सृष्टेः विकासं पारमार्थिकसत्यमन्यांश्च सम्बद्धविषयान् साधु निरूपयति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

रजतजयन्तीग्रन्थमाला—12

उपनिषदः

एकः परिचयः

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
248

वेम्पटि कुटुम्बशास्त्री

श्री शंकराचार्य संस्कृत महाविद्यालय भारतीय विद्या भवन, नई दिल्ली
28-1-98

राष्ट्रियसंस्कृतसंस्थानम्
नई दिल्ली
१९९५

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशकः
डॉ॰ कमलाकान्तमिश्रः,
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
४०-ए, राजागार्डन, विशालएन्क्लेव
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला-12

प्रथमसंस्करणम्—१९९५

वि० सं० २०५२

मूल्यम् : ५०/- रुप्यकाणि

अमर प्रिंटिंग प्रेस
दिल्ली-११०००९
दूरभाष : ७२५२३६२

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानमैषमो रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विदुषां संस्कृतानुरागिणाञ्च मनः प्रसीदतितमाम्।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणे संवर्धने संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचाराय निरन्तरं संस्थानेनानेन कृतं क्रियमाणं च कार्यकलापं वीक्ष्य संस्कृतलोकः सर्वथाभिनन्दति।

अस्मिन् रजतजयन्तीमहोत्सवावसरे राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वद्वरेण्यैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च रजतजयन्तीग्रन्थमालात्वेन तत्रभवतां समक्षं समुपस्थाप्य महान्तमानन्दं सन्तोषञ्चानुभवामः।

विविधशास्त्रेषु निष्णातैः पाण्डिचेरीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षैः **डा० वेम्पटिकुटुम्बशास्त्रि**महोदयैः प्रणीतम् इदं ग्रन्थकुसुमम् **उपनिषदः—एकः परिचयः** उपनिषद्वाङ्मयस्य परिचयं सारल्येन आतनीति। एतदर्थं विद्वांसः लेखकाः अस्माकं धन्यवादार्हाः।

अस्याः ग्रन्थमालायाः प्रकाशनादिकार्येषु कृतभूरिपरिश्रमाः अस्माकं सहयोगिनः विशेषतः डा॰ सवितापाठक-डा॰ रा॰ देवनाथन्-प्रभृतयः विशिष्टं साधुवादमर्हन्ति।

अल्पीयसि काले ग्रन्थममुं सम्मुद्र्य, यथासमयं विमोचनाय प्रस्तूय चास्माकं संकल्पपूर्तौ सहयोगाय अमरमुद्रणालयाधिकारिणः धन्यवादार्हाः।

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्

दिनाङ्क ११.१०.९५
कार्तिककृष्णतृतीया, २०५२

Bhawani Sri Sankaracharya Sanskrit ... Vidya ... Bharatiya ...

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

आमुखम्

उपनिषदः भारतस्य प्रतिष्ठाहेतुषु अन्यतमाः। परलोकः, ब्रह्म, मोक्षः इत्यादि-आमुष्मिकविचारैः गर्भितत्वेन नितरां प्रसिद्धासु एतासु ऐहिकाः देहेन्द्रियमनोविज्ञान-विषयाः बहुलतया उपलभ्यन्ते। क्रिस्तोः पूर्वं सहस्रेभ्यः वर्षेभ्यः पूर्वं भारतीयैः समधिगतानाम् आधिभौतिक-आध्यात्मिकोपलब्धीनां संग्रहणात्मिकाः एताः, अद्यतनविज्ञानेनापि परीक्षणक्षमाः विराजन्ते। अत एव अस्मिन् निबन्धे उपनिषदां रूपद्वयमिदं सम्यक् प्रदर्शयितुं कश्चन प्रयासः विहितः। किञ्च औपनिषदं चिन्तनं सर्वमपि परीक्षात्मकं परीक्ष्यकृतं च; न तु अन्धविश्वासमूलकम् इति तत्त्वं द्रढयितु-मपि प्रयासः अत्र विहितः। उपनिषदां विचारसरणिः अद्वैतसिद्धान्तस्य कथमनुकूला चकास्ति इत्यपि प्रदर्शितम्। अद्वैतसिद्धान्ते तत्त्वं पदार्थशोधनेन शुद्धस्वरूपयोः जीवब्रह्मणोः अभेदव्यवस्थापने गणयितुम् अशक्याः युक्तयः वादविवादाश्च प्रव-र्तिताः। निबन्धेऽस्मिन् तावत् अस्यां दिशि उपनिषत्सु स्वयं एषा रीतिः कुत्र कथमनुसृता इत्यत्रैव दृष्टिः प्रसारिता; न तु क्वचिदपि उपनिषदः अर्वाक्तनानां विचाराणां प्रस्तावः कृतः। प्राधान्येन अध्यायत्रयात्मना विभक्तेऽस्मिन् निबन्धे उपनिषदः अधिकृत्य ऐतिहासिकः तथा स्वरूप-संख्या-क्रमविषयकश्च परिचयः अत्यन्तनूतनानां ग्रन्थानां साहाय्येन किञ्चिदिव कृतः। द्वितीयाध्याये शरीरं, शारीरं च आत्मानमधिकृत्य उपनिषत्सु कृताः विचाराः केचन संगृहीताः। एवं तृतीये अध्याये जगत्, तस्य सृष्टिः, मूलकारणं, ब्रह्म इत्यादीनधिकृत्य उपनिषत्सु कृतानां विचाराणां संग्रहः विहितः। विचाराणाम् एतेषाम् अद्वैतसिद्धान्तानुकूल्यता च प्रक-टीकृता। भाषा तावत् यावच्छक्ति व्यावहारिकी, सर्वजनसुलभावगमा अत्र आदृता।

Digitization by Arya Samaj Charitable Foundation, Chennai

राष्ट्रियसंस्कृतसंस्थानस्य सेवायां यापितद्वादशवर्षकालस्य अस्य तच्छेवकस्य मम, संस्थानस्य रजतजयन्तीमहोत्सवावसरे एतैरक्षरसुमैः तदेव संस्थानमर्चयितुम् अयमवसरो लब्धः इति नितरां धन्यमात्मानं मन्यतेऽयं जनः । अभ्युदयस्यास्य एकमात्रकारणभूताः, विद्याप्रशासनदक्षाः, मयि च निर्व्याजस्नेहवन्तः, सहृदयशिरोमणयः विद्वद्वरेण्याः संस्थानस्य निदेशकपदमलङ्कुर्वाणाः तत्रभवन्तः **डा०कमलाकान्तमिश्र**महाभागाः सन्दर्भेऽस्मिन् कृतज्ञताञ्जलिभिः सम्माननीयाः विराजन्ते । एवं सर्वे एव राष्ट्रियसंस्कृतसंस्थानस्य अधिकारिणः कृतज्ञताञ्जलिभिः सम्मान्यन्ते ।

अनिरीक्षितकारणैः निबन्धः एषः आद्यन्तम् एकमासमात्रकालावधौ निबद्धव्यः आपतितः आसीत् । अतः अत्र ये भ्रमप्रमादजनिताः दोषाः ते सहृदयैः विद्वद्भिः सदयं मम दृष्टौ आनेयाः इति सविनयं विदुषां समक्षं विनिवेदयामि ।

निबन्धकः

विदुषां वशंवदः,

वेम्पटि कुटुम्बशास्त्री

Digitization by Arya Samaj Charitable Foundation, Chennai

विषयसूची

प्रथमाध्यायः—सामान्यतो दर्शनम् १-२७

१.१. उपनिषदः

१.२. वेदाः-उपनिषदश्च

१.३. उपनिषच्छब्दार्थः

१.४. उपनिषदां संख्या, क्रमः, कालश्च

१.४.१. उपनिषदाम् ऐतिहासिकः क्रमः

१.४.२. उपनिषदां कालः

१.५. उपनिषदां प्रविधयः

१.५.१. परोक्षप्रविधिः

१.५.२ सूत्रप्रविधिः

१.५.३. व्युत्पत्ति-प्रविधिः

१.५.४. आख्यायिका-प्रविधिः

१.५.५. सादृश्य-प्रविधिः

१.५.६. वाद-प्रविधिः

१.५.७. समन्वय-प्रविधिः

१.५.८. स्वगतभाषण-प्रविधिः

१.५.९. तात्कालिकोत्तर-प्रविधिः

१.५.१०. प्रश्नोत्तर-प्रविधिः

१.५.११. अध्यारोपापवाद-प्रविधिः

१.५.१२ "नेति-नेति" प्रविधिः

१.५.१३. कार्यात्कारणग्रहण-प्रविधिः

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वितीयाध्यायः—शरीरं च शारीरं च २८-४५

२.१. जन्मत्रयम्
२.२. पांक्तं सर्वम्
२.३. पञ्चीकरणं त्रिवृत्करणं च
२.४. शरीराणि, शरीरावयवाश्च
२.५. पञ्चकोशाः
२.६. जीवमनसोः उपलब्धिस्थानम् ।
२.७. अवस्थात्रयविचारः
२.७.१. सुषुप्तिः
२.७.२. स्वप्नावस्था
२.८. उपासनानि, तेषां फलानि च

तृतीयाध्यायः—जगच्च, तन्मूलञ्च, परमार्थसत्यञ्च ४६-६१

३.१. अपां मूलकारणत्वपक्षः
३.२. वायोः मूलकारणत्वपक्षः
३.३. आकाशस्य मूलकारणत्वपक्षः
३.४. असन्मूलकारणत्वपक्षः
३.५. सतो मूलकारणत्वपक्षः
३.६. प्रजापतेः मूलकारणत्वपक्षः
३.७. आत्मनो मूलकारणत्वपक्षः
३.८. ब्रह्मणो मूलकारणत्वपक्षः
३.९. अत्रेदमवधेयम्
३.१०. पारमार्थिकं सत्यम्
३.११. आत्मनः स्वप्रकाशत्वम्
३.१२. माया

चतुर्थाध्यायः—शिवमौपनिषदमद्वैतम् । ६२-६३

४.१. उपसंहारः । ६४

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रथमाध्यायः

सामान्यतो दर्शनम्

१.१ उपनिषदः ।

महामान्यः डा० एस्० राधाकृष्णन्- महोदयः उनिषदां परिचयं विदधानः एवं लिखति—"उपनिषदः मानवीय-प्रगतिशील-विचारधारायाः इतिहासे महत्त्वपूर्णं स्थानं प्राप्य विराजन्ते । विशिष्य च उपनिषदां चिन्तनधारा भारतीयानां दार्शनिक-चिन्तनस्य, साम्प्रदायिकतायाः, जीवनपद्धतेः, संस्कृतेः, सभ्यतायाः, जीवनमूल्यानां च उपरि त्रिसहस्रवर्षेभ्योऽपि अधिकात् कालात् स्वं प्रभावं सुस्पष्टरूपेण समुपस्थापयति स्म । उपनिषत्कालात् अनन्तरं सञ्जाताः ये आस्तिक-नास्तिक-चिन्तनमूलाः सम्प्रदायभेदाः तेषां सर्वेषाम् एताः उपजीव्याः आसन् । उपनिषदां चिन्तनधारा कदाचित् स्वेन रूपेण, कदाचित् बौद्धदर्शनादि-रूपान्तरेण च क्रमशः भरतभूमिम् अतिक्रम्य तिब्बत्, चैना, जपान्, कोरिया, श्रीलङ्का, मलेशिया, मध्य-एशिया, इत्यादि-देशेष्वपि स्वस्य प्रभावं समजनयत् । उपनिषदां वैविध्यं विविधजनानां विविधेषु विषयेषु आकर्षकम् आनन्दप्रदं च अभवत्[१] ।"

अदृष्टं यत् पारमार्थिकं तत्त्वं ब्रह्मनामकं, तस्य विषये अत्यन्तं विशदं, युक्ति-पूर्णं च व्याख्यानम् उपनिषदः विदधति । ताः मनुष्यस्य सत्तायाः रहस्यविषये अपि करतलामलकमिव अक्षिसात्कुर्वदिव विशदविमर्शं कुर्वन्ति । **दूसन्** महोदयः लिखति यत् उपनिषदः दर्शनसम्बन्धीनि सर्वाणि तत्त्वानि अधिकृत्य सुस्पष्टं विचारम् अकुर्वन्, यासु अविचारितं यत्किञ्चिदेकमपि न केवलं भारतीयदर्शनेषु अपि तु

१. S. Radhakrishnan, The Principal Upaniṣads, Indus, An imprint of Harper collins publishers India, New Delhi, 1994, p. 17

Digitization by Arya Samaj Charitable Foundation, Chennai

विश्वदर्शनेषु नोपलभ्यते। दर्शनक्षेत्रे मौलिकानां सर्वेषामेव प्रश्नानाम् उत्तराणि उपनिषद्भिः विचारितानि सन्ति। **यीट्स्**-महोदयः अभिप्रैति यत् दर्शनक्षेत्रे यः यः विवादास्पदः विषयः आसीत्, तेषु अन्यतममपि अविहाय सर्वे एव उपनिषत्सु विचारिताः इति। उपनिषदः मानवस्य पार्यन्तिकस्य लक्ष्यस्य विषये, ज्ञानस्य निर्दुष्टताविषये, एवं सत्यस्य साक्षात्कारविषये, दार्शनिकानां जिज्ञासात्मिकायाः तृष्णायाः उपशमने दत्तावधानाः आसन्। उपनिषदः परितो दृश्यमानस्य प्रपञ्चस्य तात्त्विकं व्याख्यानं कर्तुं, मोक्षस्य उपायानन्वेष्टुं च अत्यन्तोत्कटां, श्रद्धाम् उद्वहन्ति। ताः न केवलम् अस्माकं बुद्धिशक्तेः वैशद्यं सम्पादयन्ति; किन्तु अस्माकम् आत्मनः अपि संस्कुर्वन्ति[१]।

उपनिषदः मनुष्ये विद्यमानाः वैज्ञानिक-तात्त्विक-धार्मिकाः आशंसनाः पूरयितुं तथा तत्त्वसाक्षात्कारमुपजनयितुं नितरां समर्थाः[२]।

उपनिषदां मान्यता न केवलं तासाम् अपौरुषेय-श्रुति-रूपताम् आश्रित्यैव, किन्तु सहस्रेभ्यः वर्षेभ्यः भारतीयैः तत्त्वदर्शनप्रयासे, तात्त्विकस्थैर्यसम्पादने च क्रियमाणेषु प्रयत्नेषु तासां महोपकारिताम् उपलक्ष्यापि वरीवर्ति। भारतीयचिन्तनधारा प्रतिपदम् उपनिषदुन्मुखा सती, ततः नवनवां स्फूर्तिम् अभजत। उपनिषदग्निकुण्डेषु अधुनापि विचाराग्निः प्रज्वलत्येव; ये तदुन्मुखाः, तेषां सः दृष्टिगोचरो भवति; ये सत्यान्वेषिणः ते तासां सन्देशं श्रोतुमर्हन्ति[३]।

उपनिषदः यद्यपि कालेन बहुविप्रकृष्टाः; तथापि तत्प्रतिपाद्य-विषयविचाररूपेण तु सर्वदा सन्निकृष्टाः एव। ताः जातिभेदं प्रदेशभेदं च अविगणय्य, सहजान् आत्मनः परिस्पन्दात्मकान् अनुभवान् विशदयन्ति। **वाल्ट् वैट्मन्** महोदयः कथयति यत्, "एते विचाराः सर्वकालेषु सर्वदेशेषु ये मनुष्याः, तेषां सर्वेषां विचाराः भवन्ति। यदि ते मम च भवतश्च न भवन्ति, तर्हि कस्यापि न भवन्ति[४]"

१. तत्रैव। पृ.१८

२. आर्० डि० रानडे; A Constructive survey of Upaniṣadic Philosophy, Bharatiya Vidya Bhavan, Bombay, १९८६, पृ.।

३. ऍस्० राधाकृष्णन्, उदाहृतपूर्वम्, पृ.१९

४. तत्रैव, आमुखे, पृ.५.

Digitization by Arya Samaj Charitable Foundation, Chennai

ये खलु संस्कृतज्ञाः उपनिषदां साक्षादध्ययने अभ्यासवन्तः ते तासां महोन्नतभावसम्पत्तिं, मृदुमधुर-शब्द-संयोजन-कृतां काव्यसम्पत्तिम्, अतिगहनस्य जीवात्मपरमात्मनोः ऐक्यस्य साक्षादिव प्रतिपादिकाम् उक्तिसम्पत्तिम्, अतिसहजां गम्भीरां विचित्रां च सन्निवेशसम्पत्तिं च अनुभूय, हृदये अनिर्वचनीयमानन्दसन्दोहं भजन्ते । मानवसमूहस्य सम्मुखे अनादिकालात् अभिमुखीभूय स्थिरवासं कुर्वतां जगत्-उत्पत्ति-स्थिति-लयादि-विषयकाणां, "कोऽहं" "कुतोऽहम्" इत्यादीनाम् अध्यात्मविषयकाणां, नित्यशुद्ध-बुद्ध-मुक्तस्य ब्रह्मणः स्वरूप-प्राप्त्युपायादि-विषयकाणां च असंख्याकप्रश्नानां समाधानानि स्पष्टं सयुक्तिकं च प्रतिपादयन्त्यः एताः उपनिषदः, तादात्विकसंस्कृतेः, सभ्यतायाः, बौद्धिकविकासस्य, सत्यान्वेषणतत्परतायाः, परमार्थवस्तु-साक्षात्कार-वैभवस्य च निदर्शनभूताः सन्त्यः इदानीन्तनानाम् अस्माकं गर्वकारणभूताः विराजन्ते ।

स्कोपेन् होवरू लिखति यत्—"उपनिषदाम् एकैक-वाक्यतः गम्भीरं मौलिकम् उन्नतं चैकं चिन्तनम् उद्गच्छति; समग्राः उपनिषदः अत्युन्नतेन पवित्रेण श्रद्धासमन्वितेन उत्साहेन परिवृताः सन्ति । उपनिषदध्ययनसमं किञ्चिदपि अध्ययनं तादृशोपकारकं, तादृशं ज्ञानविज्ञानदं विश्वसाहित्ये एव नास्ति । उपनिषदः अद्य वा श्वो वा जगतीतले सर्वेषामेव मानवानां श्रद्धाविषयाः भविष्यन्ति[१] ।"

१.२. वेदाः—उपनिषदश्च ।

वेदाः यज्ञीय-तात्त्विक- विभागम् आश्रित्य चतुर्धा विभक्ताः— ऋग्वेदः (होतृवेदः), यजुर्वेदः (अध्वर्युवेदः), सामवेदः (उद्गातृवेदः), अथर्ववेदः (ब्रह्मवेदः) इति । प्रत्येकः वेदः पुनः द्विधा विभक्तः, मन्त्रभागः, ब्राह्मणभागः च इति । तत्र मन्त्रभागस्यैव अपरं नाम "संहिता" इति । ब्राह्मणानि तु विध्यर्थवादात्मकानि । प्रायः वेदान्ताः इति अपराभिधानाः उपनिषदः ब्राह्मणभागस्य अन्ते सन्निवेशिताः सन्ति । प्रायः अनेकेषु ब्राह्मणेषु विध्यर्थवादात्मक-ब्राह्मणभागस्य उपनिषदां च मध्ये आरण्यकनाम्ना उपासनापरः ग्रन्थभागः दरीदृश्यते । अत एव स्थूलदृष्ट्या वेदाः चत्वारः ऋग्वेदः,

---

१. तत्रैव, पृ.१७, पादटिप्पण्याम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यजुर्वेदः, सामवेदः, अथर्ववेदश्च इति प्रत्येकवेदः पुनश्चतुर्धा—संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् इति च वदन्ति। एकैकवेदस्य एकैकमेव ब्राह्मणम्, एकैका एव उपनिषत् इति नियमो नास्ति। क्वचित् एकस्य वेदस्य अनेकानि ब्राह्मणानि, अनेकाश्च उपनिषदः उपलभ्यन्ते।

वैदिककालमतिक्रम्य उपनिषत्कालं यदा प्रविशामः तदा वयमनुभवामः क्रमशः चिन्तनं सर्वं ईश्वरतत्त्वम् अतिक्रम्य आत्मतत्त्वान्वेषणे प्रविष्टम् इति। यदा खलु एषः जीवः परमात्मैव भवति, अथवा यदा आत्मनः तत्त्वसाक्षात्कारो जातः, तदा कः कस्मात् त्रस्येत् ? कः कस्मै किं वा दद्यात् ? कस्मै वा प्रयोजनाय यं कमपि ईश्वरं सः प्रार्थयेत ? संग्रहेण तु इदं वक्तुं शक्नुमः यत् यदा वयं वेदेभ्यः उपनिषद्दिशाम् आगच्छामः; तदा वयं प्रार्थनायाः सकाशात् तत्त्वचिन्तनं प्रति, सूक्तपाठस्य सकाशात् यौक्तिकं मननं प्रति, तथा बहुदेवतावादस्य सकाशात् अतिबुद्धि-अनुभवैकवेद्यम् एकेश्वरवादं प्रति आगच्छामः इति[१]।

१.३. उपनिषच्छब्दार्थः।

"उपनिषद्" इति शब्दः श्रुतिष्वेव बहुवारं प्रयुक्तः उपलभ्यते। उपनिषच्छब्द-वत् वेदान्तशब्दोऽपि प्राचीनास्वेव उपनिषत्सु प्रयुक्तो दृश्यते[२]। तैत्तिरीयोपनिषदः द्वितीय-तृतीय-वल्ल्योः अन्ते "इत्युपनिषत्" इति पठ्यते। महानारायणोपनिषदः ६२, ६३, ६४ मन्त्राणाम् अन्ते अपि "इत्युपनिषत्" इति उपनिषच्छब्दः श्रूयते।

प्राचीनोपनिषत्स्वपि यत्र उपनिषदः समुल्लेखः अस्ति, तत्र बहुत्र "गुह्यः आदे-शः"[३] "परमं गुह्यम्[४]" "वेद गुह्योपनिषत्सु गूढम्[५]" "गुह्यतमम्"[६] इत्यादिविशेष-णान्यपि प्रयुक्तानि सन्ति।

---

१. आर० डि० रानडे; उदाहृतपूर्वम्, पृ० २७

२. श्वे० उ० ६.२२; मुण्डक० उ० ३.२.६.

३. छा० उ० ३.५.२.

४. कठ० उ० ३.१७; श्वे० उ० ६.२२

५. श्वे० उ० ५.६

६. मै० उ० ६.२९

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्यत्रापि बहुषु स्थलेषु उपनिषद्विद्या एषा अपात्रभूताय न प्रदातव्या इति कथ्यमानम् उपलभामहे । छान्दोग्ये "इदं वाव तत् ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्, प्रणाय्याय वान्तेवासिने; नान्यस्मै कस्मैचन; यद्यपि अस्मा इमाम् अद्भिः परिगृहीतां धनस्य पूर्णां दद्यात्, एतदेव ततो भूय इति, एतदेव ततो भूय इति[१] ।" "एतम् उ हैव सत्यकामो जाबालः अन्तेवासिभ्यः उक्त्वा उवाच; अपि य एनं शुष्के स्थाणौ निषिञ्चेत्, जायेरन् शाखाः, प्ररोहेयुः पलाशानीति; तम् एतं नापुत्राय वानन्तेवासिने वा ब्रूयात्[२] ।" श्वेताश्वतरोपनिषदि, "वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम् । नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः[३] ।" मुण्डकोपनिषदि, "तदेतत् सत्यं ऋषिरङ्गिराः पुरोवाच । नैतदचीर्णव्रतोऽधीते[४] ।" मैत्रायणीयोपनिषदि, "एतत् गुह्यतमं नापुत्राय नाशिष्याय नाशान्ताय कीर्तयेत् इति; अनन्यभक्ताय सर्वगुणसम्पन्नाय दद्यात्[५] ।"

एतदनुरूपमेव उपनिषदृषीणाम् आचरणमपि दृश्यते । तथाहि । यमः नचिकेतसम्;[६] इन्द्रः प्रतर्दनं[७]; रैक्वः जानश्रुतिं;[८] सत्यकामः उपकोसलं;[९] प्रवाहणः आरुणिं;[१०] प्रजापतिः इन्द्रं वैरोचनं च;[११] याज्ञवल्क्यः जनकं;[१२] शाकायनः बृहद्रथं[१३] च बहुभिः प्रकारैः बहुधा परीक्ष्यैव विद्याप्रदानाय स्वीकृतवन्तः ।

---

१. छा० उ० ३.११.५-६
२. बृ० उ० ६.३.१२
३. श्वे० उ० ६.२२
४. मु० उ० ३.२.११
५. मै० उ० ६.२९
६. कठ० उ० १.२०
७. कौ० उ० ३.१
८. छा० उ० ४.२
९. छा० उ० ४.१०.२
१०. छा० उ० ५.३.७; बृ० उ० ६.२.६.
११. छा० उ० ८.८.४.
१२. बृ० उ० ४.३.१
१३. मै० उ० १.२.

Digitization by Arya Samaj Charitable Foundation, Chennai

एवञ्च "परमं गुह्यम्" इत्यादिना प्रत्यक्षतः कथनात्, "अपात्राय न दद्यात्" इति निषेधविधीनां श्रवणात्, यम आदिभिः नचिकेत आदीनां परिक्षणदर्शनात् च "उपनिषत्" इति शब्दस्य "रहस्यं" "गोपनीयम्" इत्यर्थः सिद्ध्यति। एवञ्च उपनिषच्छब्दस्य "रहस्यविद्या" इत्यर्थः स्वतः तत्पदप्रयोगसामर्थ्यादेव सिद्ध्यति। **शङ्करभगवत्पादाः** अपि "उपनिषत्" इति शब्दस्य "रहस्यम्" इत्यर्थं तत्र तत्र भाष्ये प्रदर्शयन्ति।

एतदनुकूलतया च उप-नि-पूर्वकस्य सद्-धातोः "समीपे उपवेशनम्", इत्यर्थः ग्राह्यः भवति। समीपोपवेशनं च समीपोपवेशनकार्यां "रहस्यविद्यां" परोक्षतः बोधयति।

शङ्करभगवत्पादाः क्वचिदन्यत्र षद्-धातोः विशरण-गति-अवसादन-अर्थकस्य उप-नि-पूर्वकस्य क्विबन्तस्य अस्य उपनिषच्छब्दस्य उपनिषद्ग्रन्थेषु प्रतिपाद्यमान-विद्या अर्थः इति वदन्ति। दर्शयन्ति च शब्दस्य तस्मिन्नर्थे योगम्। ये तावत् उपनिषद्विद्याम् उप = उपसद्य = उपगम्य, नि = तन्निष्ठतया निश्चयेन शीलयन्ति, तेषाम् अविद्यादेः संसारबीजस्य विशरणात् = हिंसनात्, विशरणरूपार्थयोगात् सा विद्या उपनिषदिति; ये उपनिषद्विद्यां उप = उपसद्य = उपगम्य, नि = तन्निष्ठतया निश्चयेन शीलयन्ति, तान् मुमुक्षून् परं ब्रह्म गमयति इति गत्यर्थयोगात् सा विद्या उपनिषदिति; ये तावत् उपनिषत्प्रतिपाद्याः अग्न्यादिविद्याः उप = उपसद्य = उपगम्य, नि = तन्निष्ठतया निश्चयेन शीलयन्ति, तेषां स्वर्गलोकरूप-फलप्राप्तिद्वारा गर्भवास-जन्म-जराद्युपद्रव-बृन्दस्य अवसादयितृत्वेन गर्भवास-जन्म-जराद्युपद्रव-बृन्दस्य अवसादयितृत्वेन = शैथिल्यापादनेन, अवसादनार्थयोगात् ताः विद्याः उपनिषदः इति त्रेधा षद्लृधात्वर्थयोगप्रदर्शनद्वारा उपनिषच्छब्दनिर्वचनं कुर्वन्ति **श्रीशङ्करभगवत्पादाः**[१]।

---

१. उपनिषद्भाष्यम्, प्रथमखण्डः, सं० एस्० सुब्रह्मण्यशास्त्री, महेश-अनुसन्धान-संस्थानम्, वाराणसी, १९७९, पृ० ५५-५७

Digitization by Arya Samaj Charitable Foundation, Chennai

ओल्डेन् बेर्ग् महोदयः "उपनिषत्" इति शब्दस्य "उपासना" इति शब्दस्य च अर्थे वैशिष्ट्यं नास्ति इति ब्रह्म अथवा आत्मानम् उद्दिश्य क्रियमाणा ध्यानरूपा मानसी क्रिया एव "उपासना" अथवा "उपनिषत्" इति शब्दयोः अर्थः इति च अभिप्रैति । परन्तु अयमभिप्रायः असाधुः इति **डूसन्महोदयेन** सयुक्तिकं निरणायि[१] ।

उपनिषच्छब्दः तादृशविद्याप्रतिपादक-ग्रन्थविशेषेऽपि प्रयुज्यमानः उपनिषत्स्वेव उपलभ्यते । तथाहि । तैत्तिरीयोपनिषदि केषाञ्चन अनुवाकानाम् अन्ते "इत्युपनिषत्" इति भूयः श्रूयमाणमुपलभामहे[२] । **शङ्करभगवत्पादाः** अपि "अविद्यादि-संसारहेतु-विशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रे असम्भवात्, विद्यायां च सम्भवात्, ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः, "आयुर्वै घृतम्" इत्यादिवत्" इति उपनिषच्छब्देन ग्रन्थविशेषस्य बोधनं उपचारवृत्त्या निर्वहन्ति[३] ।

पाल् डूसन् महोदयः उपनिषत्सु उपलभ्यमानान् "उपनिषद्" इति शब्दस्य प्रयोगान् सर्वान् परिशील्य, विध्यर्थवादपराणां श्रुतीनां "ब्राह्मणानि" इति व्यवहारं परिशील्य, कतिचनोपनिषद्विद्यानां क्षत्रियोपज्ञत्वं च परिशील्य, "उपनिषद्" इति नाम्ना सङ्कीर्तिताः विद्याः प्रथमं क्षत्रियैरेव आविष्कृताः संवर्धिताश्च इति, ताश्च कर्मकाण्डपराणां ब्राह्मणानां सकाशात् रहस्यतया रक्षितुं "उपनिषद्" इति सङ्कीर्त्य स्वजनेषु क्षत्रियेष्वेव प्रसारिताः इति, कालान्तरे ब्राह्मणाः अपि क्वचित् क्वचित् क्षत्रियैः एतासु रहस्यविद्यासु पराजिताः सन्तः, क्षत्रियानेव उपसद्य ताः विद्याः तेभ्यः गृहीतवन्तः इति, अनन्तरं च ब्राह्मणैः तथा गृहीताः ताः विद्याः स्वीयवेदपाठस्य अन्ते निवेश्य अध्ययनाध्यापनप्रणाल्यां योजिताः इति, अत एवं च "उपनिषदां" "वेदान्ताः" इति नाम अन्वर्थमभूदिति च कमपि विलक्षणं सिद्धान्तं प्रावर्तयत्[४] ।

---

१. Paul Deussen, The Philosophy of the Upaniṣds, Dover Publications inc. New York, १९६६, पृ.१३-१५

२. तै० उ० २.९, ३.१०

३. उपनिषद्भाष्यम्, प्रथमखण्डः, उदाहृतपूर्वम्, पृ.५७

४. Paul Deussen, उदाहृतपूर्वम्, पृ.१६-२२

Digitization by Arya Samaj Charitable Foundation, Chennai

डूसन्महोदयः पूर्वोक्तं स्वसिद्धान्तं प्रदर्शयिष्यमाणाभिः युक्तिभिः उपष्टम्भयति।

१) अस्पष्टार्थाः केचन शब्दाः, काश्चन अभिव्यक्तयः, केचन प्रविधयः "उपनिषद्" इति शब्देन निर्दिष्टाः सन्ति ये केवलं तद्विषयकोपदेशवद्भिः एव ज्ञाताः आसन्। यथा बृहदारण्यके "सत्यस्य सत्यम्"[१] इति, केनोपनिषदि "तद्वनम्"[२] इति; छान्दोग्ये च "तज्जलान्"[३] इति,। एतादृशालौकिकशब्दानां माध्यमेन ब्रह्मणः निदिध्यासनरूपम् उपासनम् उपनिषत्सु बहुषु स्थलेषु विधीयमानं दृश्यते।

२) क्वचित् कश्चन उपनिषद्ग्रन्थभागः अथवा पूर्णः उपनिषद्ग्रन्थः "उपनिषद्" इति शब्देन निदिष्टः दृश्यते। यथा—तैत्तिरीयके "इत्युपनिषत्"[४] इति द्वितीय-तृतीय-वल्ल्योः अन्ते पठ्यते।

३) उपनिषच्छब्दः क्वचित् "यज्ञीयरहस्यम्" इत्याद्यर्थे प्रयुक्तः दृश्यते। यथा-छान्दोग्ये—"यदेव विद्यया करोति श्रद्धया, उपनिषदा, तदेव वीर्यवत्तरं भवति[५]।"

४) वेदानां त्रयाणां ये ब्राह्मणग्रन्थाः, तेषाम् अन्ते पठ्यमानासु एतासु उपनिषत्सु अनेकत्र तत्तद्विद्यानां प्रभवः क्षत्रियेभ्यः राजभ्यः एवेति स्पष्टं निरूपितमस्ति। तथाहि। छान्दोग्ये[६] प्राचीनशालः औपमन्यवः इत्यादयः पञ्च महाश्रोत्रियाः महाशालाः ब्राह्मणाः आरुणिम् उद्दालकम् अभ्यागत्य वैश्वानरविद्यां प्रार्थितवन्तः। सोऽपि "न सर्वमिव प्रतिपत्स्ये" इति आत्मनि चिन्तयित्वा, कैकेयस्य अश्वपतेः राज्ञः सकाशे तान् नीत्वा, ततः तां विद्यां ग्राहितवानिति आख्यायिका पठ्यते। एवमेव बृहदारण्यके[७] गार्ग्यः बालाकिः काशिराजम् अजातशत्रुं "ब्रह्म ते ब्रवाणि" इत्युक्त्वा

---

१. बृ.उ.२.१.२०
२. केन० उ० ४.६
३. छां० उ० ३.१४.१
४. तै० उ० २.९; ३.१०
५. छां० उ० १.१.१०
६. छां० उ० ५.११.२४
७. बृ० उ० २.१

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वादशान् असदुपदेशान् कृत्वा, अजातशत्रुणा प्रतिबोधितः सन्, तमेव ब्रह्मविद्याबोधनार्थं प्रार्थयते। सन्दर्भेऽस्मिन् अजातशत्रुः "प्रतिलोमं चैतत् यत् ब्राह्मणः क्षत्रियमुपेयात्, ब्रह्म मे वक्ष्यति" इत्युक्त्वा तं ब्रह्म बोधयामासेति आख्यायते। एषा आख्यायिका कौषीतक्याम् अपि उपनिषदि उपलभ्यते[१]। एवमेव छान्दोग्ये[२] शालावत्यः शिलकः, चैकितायनः दाल्भ्यः, इति द्वौ ब्राह्मणौ प्रवाहणेन जैवलिना क्षत्रियेण उपदिष्टौ इति पठ्यते। पुनरपि छान्दोग्ये[३] प्रवाहणः जैवलिः आरुणिमुद्दिश्य स्पष्टं ब्रवीति—"यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति, तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति," इति।

प्रदर्शितेषु स्थलेषु कृताः ये विचाराः ते उपनिषदां मौलिकाः प्रश्नाः सन्तीत्यत्र नास्ति विवादः। एतेनेदं ज्ञायते यत् जीवात्मपरमात्मनोः अभेदः, मरणानन्तरम् आत्मनः सत्त्वम् इत्यादयः प्रश्नाः क्षत्रियैरेव समाहिताः, न तु ब्राह्मणैः। कालान्तरे ब्राह्मणास्तु एतद्विचारसहितान् ग्रन्थभागान् उपनिषदामन्ते सन्निवेश्य पाठे प्रवर्तयामासुः इति।

डूसन् महोदयः एतेनेदं साधयति यत् कर्मकाण्डात् अत्यन्तविलक्षणाः उपनिषदः, यद्यपि कदाचित् ब्राह्मणैरेव संहितासु ब्राह्मणेषु च बीजात्मना आविष्कृताः भवितुमर्हन्ति; तथापि क्षत्रियैरेव वर्धिताः प्रकाशिताश्च आसन्। कर्मकाण्डे निविष्टदृष्टयः ब्राह्मणाः अपि तासु प्रथमम् उदासीनाः आसन्। अनन्तरं च तासु जिज्ञासया क्षत्रियान् उपगन्तुमारेभिरे। तादृशेभ्यः ब्राह्मणेभ्यः रक्षितुमेव क्षत्रियाः स्वयूथ्येषु रहस्यतया इमाः विद्याः गोपायितवन्तः; अत एव च "उपनिषत्" नाम्ना ताःकालान्तरे प्रसिद्धिं प्रापुः। एवञ्च आत्मविषयकान्, जगद्विषयकान्, जगन्मूलकारणविषयकान् च विचारान् कर्मकाण्डस्थविचारेभ्यः विलक्षण-स्वरूपान् क्षत्रियाः एव "तद्वनं" "तज्जलान्" इत्यादिसङ्केतैः गूढं रक्षित्वा, तेषां सङ्केतानां विवरणमपि गूढतया स्थापितवन्तः। तादृशेभ्यः तेभ्यः सङ्केतेभ्यः "उपनिषद्ग्रन्थाः" समुत्पन्नाः इति॥

---

१. कौ० उ० १६

२. छां० उ० १८-९

३. छां० उ० ५.३.७

Digitization by Arya Samaj Charitable Foundation, Chennai

एष तावत् **डूसन्महोदयस्य** सिद्धान्तः यद्यपि समुचित-युक्त्युपष्टम्भ-बलेन उपस्थापितो दृश्यते, तथापि परीक्षयितव्य एव भवति । उपनिषत्सु कासाञ्चन विद्यानाम् उपदेष्टारः द्रष्टारश्च क्षत्रियाः भवन्ति इति सत्यम् । उपनिषदेव एतमंशं द्रढयति । किन्तु "उपनिषत्" इति शब्दः तांदृशविद्यानामन्ते एव न प्रयुक्तः, अपि तु प्रयुक्तः यत्र क्षत्रियाणां प्रसङ्गो न दृश्यते; यथा तैत्तिरीयके । किञ्च नितान्तम् अध्यात्मविषयकाः विचाराः यत्र छान्दोग्यषष्ठे, तैत्तिरीयके, कठे च, तत्र क्षत्रियोपज्ञत्वं स्थापयितुं पूर्वोक्तप्रमाणेषु किमप्येकं नास्तीति प्रसिद्धम् । अतः कुत्रचित् वैश्वानराद्युपासनार्थासु विद्यासु क्षत्रियोपज्ञत्वसाधकानि प्रमाणानि सन्तीत्यतः, उपनिषदः सर्वाः अपि क्षत्रियोपज्ञाः एवेति कथनं साहसमात्रम् । उपनिषच्छब्दस्य "रहस्यम्" इत्यर्थस्तु साम्प्रदायिकः एव । तावता क्षत्रियाः एव ब्राह्मणेभ्यः रक्षितुं ताः "उपनिषदः" इति सङ्केतितवन्तः इति वक्तुं न पारयामः । किन्तु बोधयितव्यस्य विषयस्य सूक्ष्मत्वं, प्रशस्तत्वं, महत्त्वं च प्रकटयितुं "उपनिषद्" इति समाख्याताः आसन्निति वयं मन्यामहे । किञ्च तेनैवोदाहृता या श्रुतिः, "प्रतिलोमं चैतत् यत् ब्राह्मणः क्षत्रियमुपेयात्, ब्रह्म मे वक्ष्यति"इति, सा विधान्तरेण ब्राह्मणाः एव आधिक्येन ब्रह्म वदन्तीति, अतएव च तत् अनुलोममिति, क्वचित् कुत्रचित् क्षत्रियाः यत्र ब्रह्म उपदिशन्ति तत् प्रतिलोमम् इति वदन्ती, तदीयं पक्षं निराकरोति ।

अतः ब्राह्मणाः क्षत्रियाः इत्यादिवर्णभेदचिन्तनया उपनिषदाम् आविर्भावविषयकं गवेषणम् आपाततः दृश्यमानस्य कस्यचन अर्थस्य अनपेक्षित-बहुदूरनयनं भवति इति विभावनीयम् ।

एवञ्च "उपनिषत्" इति शब्दः "रहस्यम्" इति, "रहस्यविद्या" इति, "संसारनाशपूर्वकं मोक्षस्य प्रापिका विद्या"इति, "ब्रह्मविद्या" इति अनेकान् परस्परसम्बद्धान् अर्थान् बोधयति इति सिद्धम् ॥

१.४. उपनिषदां सङ्ख्या, क्रमः, कालश्च ।

अद्य उपनिषन्नाम्ना उपलभ्यमानानां ग्रन्थानां संख्या द्विशताधिका दृश्यते । भारतीयपरम्परायाम् अष्टोत्तरं शतम् उपनिषदः इति प्रसिद्धिः अस्ति । राज्ञा मोहम्मद्

Digitization by Arya Samaj Charitable Foundation, Chennai

दारा शिको महोदयेन (१६५६-१६५७) पेर्षियन्-भाषायां; तदनु तदाधारेण **ए. ड्यूपेरान्** महोदयेन लाटिन् भाषायां च (१८०१-१८०२) अनूदितानाम् उपनिषदां संख्या पञ्चाशत् आसीत् । **कोल्ब्रूक्**-महोदयेन सम्पादिता: ता: द्विपञ्चाशत् आसन् । क्रि० प० १४०० काले **नारायणपण्डितेनापि** प्राय: द्विपञ्चाशत् एव उपनिषद: गणिता: । तत्रापि दशानाम् उपनिषदां प्राधान्येन कीर्तनं सम्प्रदाये वर्तते । ताश्च—

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरि: ।
ऐतरेयं य छान्दोग्यं बृहदारण्यकमेव च ॥"

इति मुक्तिकोपनिषदि पठ्यन्ते । पूर्वोक्ताभि: सह श्वेताश्वतरोपनिषदं योजयित्वा केचन एकादशोपनिषद: प्रधाना: इत्यङ्गीकुर्वन्ति । **शङ्करभगवत्पादा:** एतासामुपरि व्याख्यामकुर्वन् । ते कौषीतकीं, जाबालां, महानारायणं, पैङ्गलं चेति चतस्र: अन्या: अपि उपनिषद: नाम्ना कीर्तयन्ति ब्रह्मसूत्रभाष्ये । एताभि: सह मैत्रायणीयाम् उपनिषदं योजयित्वा षोडश उपनिषद: प्रधाना: इति अन्येषामाशय: । **श्रीरामानुजाचार्या:** सुबालां, चूलिकां, गर्भोपनिषदं, महोपनिषदं च योजयित्वा विंशत्युपनिषद: उल्लिखन्ति । एतदतिरिक्तास्तु उपनिषद: सामान्यत: पुराणानां तन्त्राणां पूरका: दृश्यन्ते[१] ।

१.४.१. उपनिषदाम् ऐतिहासिक: क्रम: ।

आर. डि. रानडे महोदय: पूर्वोक्ता: दशोपनिषद:, श्वेताश्वतरं, मैत्रायणीयं, तथा कौषीतकीं चेति आहत्य त्रयोदशोपनिषद: प्रधानत्वेन अङ्गीचकार । एवम् एतासां ऐतिहासिकक्रमविषये तेन महती चर्चा कृता दृश्यते । तस्य मते उपनिषदां काल: सम्भवत: क्रि० पू० १२०० त: क्रि० पू० ६०० पर्यन्तं भवितुमर्हति[२] । डा० राधाकृष्णन् महोदयस्तु क्रि० पू० ८०० त: क्रि० पू० ३०० पर्यन्तं उपनिषत्काल: भवितुमर्हतीति अभिप्रैति ।

---

१. एस्. राधाकृष्णन्, उदाहृतपूर्वम्, पृ. २०-२१
२. आर० डि० रानडे, उदाहृतपूर्वम्, पृ० ९

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्किञ्चिदस्तु । स्वीकृते काले उपनिषदां पूर्वोत्तरभावः कीदृशः इत्येतत् अधुना विचार्यते ।

१) भाषा, शैली, शब्दसमुदायः, व्याकरणविशेषाः, इत्येते उपनिषदां पौर्वापर्य-निर्णये उपायभूताः भवन्ति ।

२) गद्यात्मकता, पद्यात्मकता अपि क्वचित् उपायत्वेन कैश्चिदाश्रीयते ।

३) पूर्वं सूक्ष्मतया निर्दिष्टस्य कस्यचन विषयस्य उत्तरोत्तरं विस्तरेण प्रतिपादनम् इत्येषः अन्यः कश्चन समर्थः उपायः । इन्द्रियाणां कलहात्मकः सन्निवेशः छान्दोग्ये, बृहदारण्यके, ऐतरेये, कौषीतक्यां, प्रश्ने च सन्दृश्यते । तत्र सन्निवेशस्य अधिकाधिक-सोङ्गोपाङ्ग विस्तारमाश्रित्य उपनिषदां क्रमनिर्णये दोषो न भविता ।

४) एवमेव कस्यचन सैद्धान्तिकस्य अभिप्रायस्य क्रमशः विकासमाश्रित्यापि उपनिषदां क्रमं ज्ञातुं शक्नुमः । तथाहि । जीवात्म-परमात्मानौ, तयोः स्वभावभेदं सम्बन्धभेदं च ख्यापयन् अभिप्रायः कठे, मुण्डके, तथा श्वेताश्वतरेऽपि उपलभ्यते । तत्र कठे तावत् "ऋतं पिबन्तौ" इति उभयोरपि कर्मफलानुभवः प्रतिपादितः । मुण्डके च "द्वा सुपर्णा" इत्यादिना एकस्य कर्मफलभोगः, अन्यस्य तु साक्षित्वमात्रं प्रतिपादितम् । श्वेताश्वतरे "अजामेकाम्" इत्यादिना जीवात्मना प्रकृतेः त्रिगुणायाः भोगः, परमात्मना तु भुक्तभोगायाः तस्याः त्यागश्च वर्णितः । एतादृशेन अभिप्राय-गतविकासेन उपनिषदां क्रमः निश्चेतुम् अर्हः ।

५) उपनिषत्सु परस्परं वा अन्यतरस्याम् इतरस्याः इतरासां वा वाक्योल्लेखः अपि पौर्वापर्यनिश्चये सहकारी भवति । यथा तैत्तिरीयके "अथाध्यात्मम् । प्राणो-व्यानोऽपानउदानस्समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म मांसं स्नावास्थि-मज्जा । एतदधिविधाय ऋषिरवोचत् । पांक्तं वा इदं सर्वम्; पांक्तेनैव पांक्तं स्पृणोतीति"इति । बृहदारण्यके च "स एष पांक्तो यज्ञः, पांक्तः पशुः, पांक्तः पुरुषः पांक्तमिदं सर्वं, यदिदं किं च" इति श्रूयते । अतः तैत्तिरीयकं बृहदारण्यकतः अर्वाक्तनमिति निश्चेतुं शक्नुमः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एतेषामुपायानाम् आधारेण पूर्वोक्तानां त्रयोदशोपनिषदाम् ऐतिहासिकक्रमं पञ्चभिः समुदायैः विभज्य दर्शयति श्रीमान् **रानडे** महोदयः[१] ।

१) बृहदारण्यकम्, छन्दोग्यं च ।

२) ईशोपनिषत्, केनोपनिषत् ।

३) ऐतरेयं, तैत्तिरीयं, कौषीतकी च ।

४) कठोपनिषत्, मुण्डकं, श्वेताश्वतरं च ।

५) प्रश्नोपनिषत्, मैत्रायणीयोपनिषत्, माण्डूक्यं च ।

डूसन्-महोदयस्तु[२] (१) प्राचीनगद्यात्मिकाः उपनिषदः, (२) पद्यात्मिकाः उपनिषदः, (३) अर्वाचीनाः गद्यात्मिकाः उपनिषदः इति त्रेधा विभागं प्रदर्श्य प्रधानोपनिषदः एवं क्रमेण स्थापयति ।

(१) प्राचीनगद्यात्मिकाः उपनिषदः । (प्राचीनाः)

(१) बृहदारण्यकम्, (२) छान्दोग्यम्, (३) तैत्तिरीयम् (४) ऐतरेयम्, (५) कौषीतकी, (६) केनोपनिषत् ।

(२) छन्दोबद्धाः उपनिषदः । (मध्यकालीनाः)

(१) कठोपनिषत् (२) ईशोपनिषत् (३) श्वेताश्वतरोपनिषत् (४) मुण्डकोपनिषत् (५) महानारायणोपनिषत् ।

(३) अर्वाचीनाः गद्यात्मिकाः उपनिषदः ।

(१) प्रश्नोपनिषत्, (२) मैत्रायणीयोपनिषत्, (३) माण्डूक्यम्

यद्यपि विभागयोः अनयोः अत्यधिकः भेदः फलतः नास्ति तथापि विभाजकोपाधयः भिन्नाः इति अवधेयम् । **डूसन्**-महोदयः एवमभिप्रैति यत् एकैकस्यामपि

१. तत्रैव०, पृ० ८-१२
२. पाल् डूसन्, op. cit, p. २२-२६

Digitization by Arya Samaj Charitable Foundation, Chennai

उपनिषदि तत्तद्विचारधारामाश्रित्य कतिचनग्रन्थभागानाम् अपि पौर्वापर्यं निश्चेतुं शक्यमस्ति । तथापि, उपनिषदः एकत्वम् आश्रित्य पूर्वोक्तः विभागः प्रदर्शितः इति ।

१.४.२ उपनिषदां कालः ।

डूसन्-महोदयस्य गवेषणात् अनन्तरम् उपनिषदाम् ऐतिहासिक-क्रमविषये प्रायः सर्वेषामेव विदुषां सम्मतिः आसीत् । किन्तु उपनिषदां कालविषये तु अपेक्षिता चर्चा अथवा समुचितः निर्णयः तावता न सम्पन्नः ।

उपनिषदां कालविषये चर्चां कृतवतां बहूनां विदुषाम् एषः अभिप्रायः यत् ताः भगवतो बुद्धस्य अवतारात् प्राक्तनाः इति । **माक्स्मुल्लर्**-महोदयः सूत्रवाङ्मयस्य कालं क्रि० पू० ६०० तः २०० पर्यन्तं भवितुमर्हतीति निश्चित्य उपनिषदः ततः (क्रि० पू० ६०० तः) प्राक्तनाः इति निरणयत् । **डा० राधाकृष्णन्**-महोदयः उपनिषदां कालं क्रि० पू० १००० तः क्रि० पू० ३०० पर्यन्तं भवितुमर्हतीति अभिप्रैति । **एस. के. बेल्वारकर**-महोदयः क्रि० पू० १२५० तः क्रि० पू० ५०० पर्यन्तं भवितुमर्हतीति अभिप्रैति[१] ।

अद्यतनीनैः कैश्चिद्विद्वद्भिः पुनरप्यत्र विषये प्रयासः कृतः । तेषां प्रयत्नानां पृष्ठतः भूमिकाद्वयं दृश्यते । (१) एका तावत् उपनिषदां भाषा तथा शैली पाणिनेः पूर्वतना वा अर्वाक्तना वा इति परीक्षा ।

(२) द्वितीया तावत्, उपनिषदां तत्तद्दर्शनैस्सह विद्यमानः सम्बन्धः । एतद्भूमिकाद्वये अन्यतरामाश्रित्य कृतानाम् उपनिषत्कालविषयकगवेषणानां फलानि स्थूलतः एवं दृश्यन्ते ।

१. भाषापरीक्षणपद्धतिः

ओट्टो वेक्कर-महोदयः उपनिषत्सु विभक्तिप्रयोगस्य अध्ययनं विधाय, पाणिनेः व्याकरणेन सह तेषां प्रयोगाणां तोलनं विधाय, तदाधारेण उपनिषदः चतुर्धा विभक्तवान् ।

---

१. हाजिम् नाकामूरा, A History of Early Vedanta Philosophy, मोतीलाल बनारसीदास्, दिल्ली, १९९०, part I, p. ३१

Digitization by Arya Samaj Charitable Foundation, Chennai

(१) बृहदारण्यकम्, छान्दोग्यम्, कौषीतकी च पाणिनेः प्राक्कालिकानि भवितुमर्हन्ति ।

(२) ऐतरेयम्, तैत्तिरीयम्, कठोपनिषत् च प्रायः पाणिनेः प्राक्कालिकानि भवितुमर्हन्ति ।

(३) केनोपनिषत् ईशोपनिषदपि पाणिनेः प्राक्कालिके इति ऊहितुं शक्येते ।

(४) श्वेताश्वतरोपनिषत्, मैत्रायणीयोपनिषत् च पाणिनेः पश्चात्कालिके भवतः इति[१] ।

विल्लिबाल्ड् किर्फेल्-महोदयः उपनिषत्सु प्रयुक्तानां समस्तपदानां पाणिनेः व्याकरणेन सह तोलनं विधाय एवं निश्चिनोति ।

(१) बृहदारण्यकस्य पाणिनेः प्राक्कालिकत्वं निश्चितम् ।

(२) प्रश्नोपनिषद्, मुण्डकोपनिषद्, कठोपनिषत् च पाणिनेः प्राक्कालिकाः एव ।

(३) श्वेताश्वतरोपनिषत् पाणिनेः अर्वाक्कालिका इति[२] ।

फर्स्ट-महोदयः सन्धिं तथा सुप्तिङ्प्रत्ययानां परिणामं च अधीत्य—

(१) बृहदारण्यकं, छान्दोग्यम्, कौषीतकीं च पाणिनेः प्राक्कालिकानि इति निश्चिनोति ।

(२) ऐतरेयम्, तैत्तिरीयम्, कठं, मुण्डकं चापि पाणिनेः पूर्वकालीनमेवेति अभिप्रैति ।

(३) ईश-केनोपनिषदोः विषये अनिश्चिततां व्यक्तीकरोति ।

(४) श्वेताश्वतरं, महानारायणं च पाणिनेः पश्चात्कालिकमिति अङ्गीकरोति[३] ।

---

१. तत्रैव । पृ. १४

२. तत्रैव, पृ. १४-१५

३. तत्रैव, पृ. १५

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं त्रिभिः विद्वद्भिः भाषामूलकान् त्रीन् भिन्न-भिन्नविषयान् आधारीकृत्य पाणिनिं कालविभाजकम् अङ्गीकृत्य कृते अध्ययने यानि फलानि प्राप्तानि, तानि प्रायः समानाभिप्रायाणि दृश्यन्ते । न केवलम् एतत् । अन्यैः उपायैः य एव उपनिषदां क्रमः पूर्वं निश्चितः, प्रायः स क्रमः उपष्टम्भितः अनेन । किन्तु पाणिनेः कालविषये एव एतावता कोऽपि निर्णयः सर्वैरनुमोदितः न सञ्जातः । अतः तन्मात्राधारेण कृतमेतत् अध्ययनं न प्रगल्भते उपनिषदां कालनिर्णयाय । किञ्च, भाषापरिशीलनपद्धतौ न्यूनता सहजा अस्त्येव । यतो हि, कदाचित् अर्वाचीनोऽपि उपनिषत्कर्ता तस्याः प्राचीनत्वं द्योतयितुं प्रयत्नपूर्वकं प्राचीनभाषाम् उपयुञ्ज्यात् । एवं प्राचीनायामपि उपनिषदि सहजस्फूर्तीनाम् आविष्करणे अप्रयत्नम् उपयुक्ता या सरला भाषा सा तस्याम् अर्वाचीनतां द्योतयेत् । अपि च पूर्वप्रदर्शितैः अध्ययनैः एतदेव सिद्धयति यत् पाणिनेः प्राक्तनानि इति । किन्तु तथा पाणिनेः पूर्वकालिकत्वेन निश्चितानाम् उपनिषदां प्राचीनतायाः इयत्ताविषये एतान्यध्ययनानि न अतीव उपकुर्वन्ति ।

(२) दर्शनान्तर-सम्बन्ध-स्थापन-पद्धतिः ।

हाजिम् नाकामुरा-महोदयः पूर्वोक्तान् त्रीन् पाणिन्युपाधिकृतान् भाषाध्ययन-परान् सिद्धान्तान् समीक्ष्य तदुपष्टम्भकतया तत्तदर्शनसिद्धान्तैः सह उपनिषदां विद्यमानं सम्बन्धमधीत्य विलक्षणं कञ्चित् उपनिषदां कालविचारं प्रावर्तयत् । विस्तरेण तेन सयुक्तिकं कृतस्य विचारस्य असौ सारांशः भवति[१] ।

(१) कठोपनिषदि, श्वेताश्वतरोनिषदि, मैत्रायणीयोपनिषदि च सांख्यदर्शन-चिन्तनं स्पष्टं भासते । तद्दर्शनसम्बन्धीनि पारिभाषिकपदान्यपि तासु उपलभ्यन्ते । किन्तु तावता सांख्यदर्शनप्रभावेण तच्चिन्तनं तासूपनिषत्सु प्रवेशितमिति, अत एव एताः उपनिषदः सांख्यदर्शनप्रादुर्भावतः अर्वाक्तनाः इति निश्चेतुं नार्हामः । कदाचित् सांख्यदर्शनमूलभूताः एते विचाराः उपनिषत्स्वेव पूर्वोक्तासु आविष्कृताः, अनन्तरं च सांख्यसिद्धान्ते स्वीकृताः इत्यपि वक्तुं शक्नुमः । सांख्यदर्शनस्य प्राचीनेतिहासः नितराम् अस्पष्टः । अतः विषयेऽस्मिन् किमपि निश्चेतुं नार्हामः ।

१. तत्रैव, पृ. १५-४१

Digitization by Arya Samaj Charitable Foundation, Chennai

(२) योगदर्शनविचाराणाम् अपि सद्भावं तत्र तत्र उपनिषत्सु वयम् अवगच्छामः किन्तु उपनिषदां कालनिर्णयविषये एतदपि न अत्यन्तमुपकरोति।

(३) प्राचीनेषु दर्शनेषु बौद्धदर्शनस्य परम् इतिहासः स्पष्टरूपेण निरूपितोऽस्ति। न केवलं भारते किन्तु चैना इत्यादिविदेशेष्वपि तदीयेतिहासं निरूपयितुं स्पष्टप्रमाणानि सन्ति। अतः दर्शनस्यास्य विचाराणाम् आदानप्रदानमाश्रित्य उपनिषदां कालनिर्णयः सुकरः।

तथाहि। कठोपनिषदि पठ्यते।

"यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।
एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावति॥
यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।
एवं मुनेर्विजानत आत्मा भवति गौतम[1] ॥ इति।

अत्र प्रयुक्तः धर्मशब्दः किमर्थकः इति निश्चेतुं काठिन्यमनुभवामः। प्रकरणादिसाहाय्येन तावत् पूर्णतः वैदिकस्य धर्मशब्दस्य अर्थोऽपि न सङ्गच्छते। एवं पूर्णतः बौद्धदर्शनसिद्धोऽप्यर्थः न सङ्गच्छते। **शङ्करभगवत्पादास्तु** धर्मशब्दस्य "आत्मनः" इति अप्रसिद्धार्थम् अङ्गीकुर्वन्ति। किञ्च "तस्मात् कुतार्किक-भेददृष्टिं च उज्झित्वा मातृपितृसहस्रेभ्योऽपि हितैषिणा वेदेनोपदिष्टम् आत्मैकत्वदर्शनं शान्तदर्पैः आदरणीयम् इत्यर्थः" इति निगमनात्मिकां व्याख्यामकुर्वन्[2]।

किन्तु, "आगमाः" इति प्रसिद्धानां ग्रन्थानां, चीनभाषायाम् अनूदितानां मध्ये कस्मिंश्चित् वच्छपरिव्राजकस्य बुद्धेन सह संवादात्मके संयुक्तागमस्य ग्रन्थभागे अयमभिप्रायः एवमेवानूदितो दृश्यते। वच्छपरिव्राजकः गौतममुद्दिश्य-"त्वां किमपि विवक्षुरस्मि; श्रद्धया त्वया श्रोतव्यम्" इति वदति। बुद्धः अनुमन्यते "यथेच्छं वद" इति। वच्छः वदति, "यथा खलु महत्यां वृष्टौ अन्तरिक्षतः पतन्त्यां जलप्रवाहः अधः प्रवहति; अन्ते च महासमुद्रं प्रविशति। एवमेव त्वया प्रतिबोधितं धर्मं

१. कठ० उ० ४-१४,१५
२. तत्रैव।

Digitization by Arya Samaj Charitable Foundation, Chennai

महानिशायां प्रतिगृह्य पुरुषाः, स्त्रियः, युवकाः, बालकाः, विकलाङ्गाः, वृद्धाः, सर्वे एव निर्वाणमधिगच्छन्ति" इति[१]।

एवमेव पालीभाषायां निबद्धे "महावच्छगोत्तसुत्तान"-नाम्नि ग्रन्थे वच्छः वदति—"यथा खलु गङ्गा समुद्राभिमुखिनी प्रवर्तते, समुद्रं स्पृशति, समुद्रेऽन्तर्भवति। एवमेव, हे गोतम! भवतो धर्मः—यत्र साधारणाः जनाः, परिव्राजकाश्च सङ्गता भवन्ति—निर्वाणं प्रति गच्छति, निर्वाणं स्पृशति, निर्वाणेऽन्तर्भवति।" इति[२]॥

न केवलमेतत्। कठोपनिषदि यमनचिकेतसोः संवादे, तृतीयप्रश्नस्य समाधान-समये यमेन कृतं नचिकेतसः प्रलोभनम् अन्यादृशम् अत्यन्तदीर्घं तथा इतरासु उपनिषत्सु अनुपलभ्यमानं च दृश्यते। प्रकरणेऽस्मिन् ये अभिप्रायाः कठोपनिषदि आविष्कृताः, ते सर्वे तथैव बौद्धग्रन्थेषु "अग्गिवच्छगोत्तसुत्तम्" इत्यादिषु समुल्लिखिताः सन्तीति पश्यामः।

अतः प्रदर्शितैः हेतुभिः कठोपनिषदः उपरि बौद्धदर्शनस्य प्रभावः स्पष्टः। अथ भवेत् कुतो वा एते विचाराः कठोपनिषदः प्रभावेण बौद्धदर्शने प्रविष्टाः इति नाङ्गीक्रियेत इति संशयः। तत्र समाधानं तु—यद्यपि निचिकेतसः प्रस्तावः ब्राह्मणेष्वपि दृश्यते, तथापि कठोपनिषद्येव अकाण्डे एषा उपवर्णनपद्धतिः आश्रिता, या अन्योपनिषद्विलक्षणा। अतः कठोपनिषदः उपरि बौद्धदर्शन-प्रभावोस्तीति सिद्ध्यति।

एवमेताभिः अन्याभिश्च काभिश्चित् युक्तिभिः कठोपनिषदः उपरि बौद्धदर्शनप्रभावं साधयित्वा, मध्यकालीनानाम् अर्वाचीनकालीनानाञ्च उपनिषदां भगवतो बुद्धात् अर्वाचीनत्वं, प्राचीनोपनिषदाञ्च बुद्धात् प्राक्तनत्वं व्यवस्थाप्य उपनिषत्कालं क्रि० पू० ६०० तः ३०० पर्यन्तमिति स्थापयति **नाकामूरामहोदयः**।

वयं तु अत्रैवं मन्यामहे। सूक्ष्मतया विस्तरेण च परिशीलनार्हाः एते विचाराः। स्थूलतस्तु-बौद्धदर्शनस्य ये उपदेशाः, ते तत्र तत्र वैदिकग्रन्थेषु उपलभ्यमानाः एव। वस्तुतः प्रधानभूतान् सिद्धान्तान् वेदेभ्यः उपनिषद्भ्यः एव स्वीकृत्य, स्वीयतर्कबलेन

१. हाजिम् नाकामूरा, उदाहृतपूर्वम्, पृ. २०-२१

२. तत्रैव।

Digitization by Arya Samaj Charitable Foundation, Chennai

तेषां तार्किकं रूपं वर्धयन्तः एते, वैदिकेषु विचारेषु आचारेषु च क्वचित् स्वविरोधं प्रकटयन्तः, क्रमशः स्वीयसिद्धान्तस्य तर्कमूलत्वं प्रकटय्य वेदनिन्दकाः सञ्जाताः। अत एव उत्पत्तिभूमौ भारते एतेषां स्थितिः वृद्धिश्च दुर्बला जाता। अतः क्वचित् अभिप्रायसाम्यम् अस्ति चेत् तत् उपनिषद्भ्यः एव बौद्धदर्शने स्वीकृतं स्यादिति कथने हानिः नास्ति। किञ्च, उपनिषत्सु सङ्ग्रहेण विद्यमानानाम् अभिप्रायाणां विस्तरेण पाली-प्राकृत-ग्रन्थेषु उपलब्धिरपि अमुमंशं द्रढयति। शङ्करभगवत्पादेभ्यः बौद्धदर्शनं प्राचीनमित्यत्र विमतेः अभावात्, मन्त्रद्वयव्याख्यानानन्तरं अभिप्रायप्रकटनरूपं यत् प्राक्प्रदर्शितं शङ्करभगवत्पादलेखनं, तत्र परोक्षया विधया बौद्धादिदर्शनानां निन्दनात्मकतया व्याख्याने असामञ्जस्यं किमपि नास्ति। तावता उपनिषद्येव बौद्धदर्शनमधिकृत्यैवैतादृशः प्रस्तावः कृत इति तैरङ्गीकृतमिति न सिद्ध्यति; किन्तु सिद्ध्यति साधारणतया वेदविरोधिचिन्तनस्य निन्दनरूपम् एतत् बौद्धादिदर्शनेषु समन्वीय तैः प्रदर्शितमिति।

किञ्च, पूर्वप्रदर्शिते मन्त्रद्वये वच्छपरिव्राजकसम्बोधनस्य छाया कीदृशी इत्यपि विचारणीयम्। पर्वतस्योपरिवृष्टिः मन्त्रे; साधारणी वृष्टिः संयुक्तागमे। पर्वताग्रे वृष्टस्य जलस्य विविधासु दिक्षु परिपतनात् नाशः वर्ण्यते मन्त्रे। अन्तरिक्षतः सम्भूतायां वृष्टौ, सर्वतः संवर्धितस्य जलस्य प्रवाहरूपेण समुद्रे संगमः संयुक्तागमे वर्ण्यते। पर्वतवृष्ट्युपमा नाशस्य मन्त्रे। वृष्ट्युपमा निर्वाणप्रापणस्य संयुक्तागमे। एवञ्च कस्मिन्नंशेऽनुभूयते सादृश्यम्? न कस्मिन्नपि। कदाचित् स्यादपि साम्यम्। तथापि सर्वलोकप्रसिद्धेयं वृष्ट्युपमा किमिति द्वयोः स्वतन्त्रयोः ग्रन्थकर्त्रोः हृदये न प्रतिभासेत?

किञ्च, यत्र उपनिषत्सु सांख्यदर्शनछाया दृश्यते, तत्र सांख्यसिद्धान्ततः एव उपनिषत्सु प्रविष्टा सा छाया इति निश्चित्य न वदति नाकामूरा-महोदयः। तत्र उपनिषद्भ्यः एव सांख्ये ते विचाराः गतास्स्युः इत्यपि सम्भावयति। यद्येवं तर्हि कुतः बौद्धदर्शनछायाविषयेऽपि न दीयते सैव दृष्टिः?

तदेवं प्राक्तनाः केचन पाश्चात्यविद्वांसः तथा भारतीयाः विद्वांसश्च क्रि० पू० ६०० तमं वर्षं पूर्वावधिम् अङ्गीकृत्य तत उत्तरं क्रि० पू० सहस्रतमवर्षपर्यन्तं ततोऽपि

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्चिदुत्तरं वा उपनिषत्कालं मन्यन्ते । अर्वाक्तनाः पाश्चात्यविद्वांसः तु क्रि० पू० ६०० तमं वर्षम् उत्तरावधित्वेन स्वीकृत्य क्रि० पू० ३०० तमवर्षपर्यन्तं पूर्वावधिं नयन्ति । एवम् उपनिषत्कालविषये द्विविधं चिन्तनं अद्यावधि वरीवर्ति । यदस्ति, तदस्तु । प्रधानोपनिषदां क्रमविषये तु प्रायः समेषां सम्मतिरेव दृश्यते ।

१.५. उपनिषदां प्रविधयः ।

उपनिषदः बहून् विविधान् आध्यात्मिकान् तदितरांश्च उपदेशान् कुर्वन्ति । वक्तारं, बोद्धव्यं, विषयं च आधारीकृत्य उपदेशकरणविषये बहवः एव प्रविधयः उपनिषत्सु प्रयुक्ताः दृश्यन्ते । श्रीमान् आर० डि० रानडे-महोदयः तादृशान् उपदश-प्रविधीन् परिचनोति[१] ।

१.५.१. परोक्षप्रविधिः ।

"परोक्षप्रिया इव हि देवाः"[२] इति श्रुतिरेव वेदर्षीणां परोक्षप्रियत्वं ख्यापयति । उपनिषत्स्वपि एषः परोक्षोपदेशप्रविधिः बहुषु स्थलेषु अनुसृतो दृश्यते । छान्दोग्ये शाण्डिल्यविद्यायां "सर्वं खल्विदं ब्रह्म, तज्जलान् इति शान्त उपासीत ।"[३] इत्यत्र, ततः = ब्रह्मणः जातं, तस्मिन् = ब्रह्मणि लीयते, तेन = ब्रह्मणा अनिति = जीवति इति, जगज्जन्मस्थितिभङ्गकारणं ब्रह्म इति ब्रह्मलक्षणं परोक्षविधया "तज्जलान्" इति संकेतात्मकेन शब्देन उपदिष्टमनुभवामः । श्वेताश्वतरे तु इतोऽपि स्पष्टतरमुदाहरणं प्राप्नुमः ।

"तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः ।

अष्टकैः षड्भिः विश्वरूपैकपाशं पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् ।

पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः[४] ॥"

---

१. आर० डि० रानडे, उदाहृतपूर्वम्, पृ. २३-२८

२. ऐ० उ० ३.१४

३. छां० उ० ३.१४

४. श्वे० उ० १.४-५

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र मन्त्रद्वये जगदिदं क्रमात् चलता चक्रेण, प्रवहन्त्या नद्या च रूपयित्वा परोक्षतया वर्ण्यते । अत्र

एकनेमिः = "नेमिरिव नेमिः" = सर्वाधारः = ईश्वरः ।

त्रिवृतं = सत्त्वरजस्तमोरूपगुणत्रयेण त्रिगुणं;

षोडशान्ताः = पञ्चभूतानि पृथिव्यादीनि, पञ्चज्ञानेन्द्रियाणि चक्षुरादीनिं, पञ्चकर्मेन्द्रियाणि वागादीनि, तथा मनः इति षोडश पदार्थाः, अन्तर्भूताः ।

शतार्धाराः = पञ्चाशत् अराः सांख्यदर्शनप्रसिद्धाः विपर्यय-अशक्ति-तुष्टि-सिद्धीनाम् अवान्तरभेदाः पञ्चाशत् ।

विंशतिः प्रत्यराः = पञ्च ज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, तेषां विषयाः

षट् अष्टकानि = १) प्रकृतिः, तस्याः कार्याणि पञ्चभूतानि, मनोबुद्ध्यहङ्काराश्च इति अष्टौ ।

२) अष्टधातवः

३) अष्टैश्वर्याणि

४) अष्ट भावाः

५) अष्ट वसवः

६) अष्ट सिद्धयः अणिमादयः ।

विश्वरूपैकपाशः = बहुमुखः कामः ।

त्रिमार्गाः = धर्मः अधर्मः ज्ञानं च

द्वे निमित्ते = सुकर्म, दुष्कर्म

एकः मोहः = अज्ञानम् ।

द्वितीयमन्त्रे जगदिदं जलप्रवाहेण रूपयित्वा उपदिश्यते ।

पञ्च स्रोतांसि = पञ्चज्ञानेन्द्रियाणि

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्च योनयः = पञ्चभूतानि

पञ्च ऊर्मयः = पञ्चप्राणाः

पञ्च मूलानि = अन्तः करणपञ्चकं = मनः, बुद्धिः, अहङ्कारः, चित्तम्, अन्तः-करणम् ।

पञ्च आवर्ताः = पञ्च इन्द्रियविषयाः रूपादयः

पञ्च ओधवेगाः = जायते, अस्ति, वर्धते, विपरिणमते, अपचीयते इति पञ्च भावविकाराः ।

पञ्चाशद्भावाः = सांख्यदर्शनसिद्धाः पञ्चाशद्भावाः ।

पञ्च पर्वाणि = बाल्यं, कौमारं, यौवनं, जरा, मरणम् इति पञ्च अवस्थाः ।

एवं परोक्षविधया विविधाः उपदेशाः उपनिषत्सु उपलभ्यन्ते । एतादृशोपदेशानां विवक्षितार्थः गुरुशिष्यपरम्परामाश्रित्यैव प्राप्तव्यो भवति । प्रायः अध्यात्मचिन्तनात्मकेषु ग्रन्थेषु एषः प्रविधिः सर्वत्र प्रचुरतया दृश्यते ।

१.५.२. सूत्रप्रविधिः ।

विस्तृतस्य गम्भीरस्य च कस्यचन विचारस्य अल्पैः अक्षरैः सूत्ररूपेण उपदेशः उपनिषत्सु दृश्यते; तदनु क्वचित् तस्य व्याख्यानञ्च । कदाचित् तत्र तत्र उपनिषत्सु प्रयुक्तः एषः प्रविधिः एव सूत्रवाङ्मयस्य उत्पत्तौ कारणताम् अगच्छत् स्यात् । यथा माण्डूक्ये—"ओमित्येतदक्षरमिदं सर्वम् । तस्योपव्याख्यानम्, भूतं भवत् भविष्यदिति सर्वम् ओंकारः एव । यच्चान्यत् त्रिकालातीतं तदप्योंकार एव[१] ।"

१.५.३ व्युत्पत्ति-प्रविधिः ।

ब्राह्मणग्रन्थानां प्रभावात् उपनिषत्स्वपि विलक्षण-व्युत्पत्तीनां दर्शनेन तत्त्वानां व्याख्यानकरणम् अनुवर्तते । तथाहि । छान्दोग्ये—"यत्रैतत्पुरुषः "स्वपिति" नाम; सता सोम्य तदा सम्पन्नो भवति, तस्मादेनं "स्वपिति" इत्याचक्षते ।" ।..."अशनाया

---

१. मां.उ.आदौ

Digitization by Arya Samaj Charitable Foundation, Chennai

पिपासे मे सोम्य विजानीहि इति । यत्रैतत्पुरुषः अशिशिषति नाम; अप एव तदशितं नयन्ते ।...यत्रैतत्पुरुषः पिपासति नाम; तेज एव तत्पीतं नयन्ते[१] ।" इति । अत्र "स्वपिति" इति क्रियापदस्य, स्वे = सत्पदार्थे, अपीतो भवति = लयं गच्छति इति निर्वचनकरणद्वारा, सुषुप्तौ आत्मानः मूलकारणे सत्पदार्थे लयः उपदिश्यते । एवमेव बुभुक्षार्थकस्य "अशनाया"इति पदभ्य द्वेधा विभागं प्रदर्श्य "अशितं = भुक्तं, नयन्ति" इति व्युत्पत्त्या आपः अशनायाशब्दवाच्याः इति उपदिशति । एवं "पिपासा" पदस्य "पीतं = जलं, नयति = शोषयति" इत्यर्थं स्वीकृत्य पिपासाशब्दस्य तेजः एवार्थः इति उपनिषत् सूचयति ।

एवं बृहदारण्यके—"स वा अयं पुरुषः सर्वासु पूर्षु पुरि शयः, नैनेन किञ्चन अनावृतं, नैनेन किंचनासंवृतम्[२] इतयत्र "पुरि = शरीरे, शेते = शयनं करोति = व्याप्नोति" इति पुरुषशब्दस्य व्युत्पत्तिं प्रदर्शयति ।

माण्डूक्ये—"सोऽयमात्मा अध्यक्षरम् ओंकारः, अधिमात्रं पादा मात्रा मात्राश्च पादाः अकार-उकार-मकार इति । जागरितस्थानः वैश्वानरोऽकारः प्रथमा मात्रा, **आप्तेः आदिमत्त्वात् वा,** आप्नोति ह वै सर्वान् कामान् आदिश्च भवति य एवं वेद । स्वप्नस्थानः तैजस उकारः द्वितीया मात्रा, **उत्कर्षात् उभयत्वात् वा,** उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति, नास्याब्रह्मवित् कुले भवति य एवं वेद । सुषुप्तस्थानः प्राज्ञो मकारः तृतीया मात्रा, **मितेः अपीतेर्वा,** मिनोति ह वा इदं सर्वमपीतिश्च भवति, य एवं वेद । अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः, एवमोंकार आत्मैव । संविशत्यात्मनात्मानं य एवं वेद"[३] इति । अत्र "ओम्" इत्यक्षरस्य यत् मात्रात्रयं अकारः उकारः मकारः इति, तेषां क्रमशः प्राप्तिः आदिमत्त्वं च, उत्कर्षः उभयत्वं च मितिः अपीतिश्च अर्थः इति व्युत्पादयति । छान्दोग्ये, "स वा एष आत्मा हृदि, तस्यैतदेव निरुक्तं हृद्ययमिति, तस्मात् हृदयम्"[४] इति हृदयशब्दस्य निर्वचनम् उपदिश्यते ।

---

१. छां० उ० ६.८.१-३

२. बृ.उ.२.५.१८

३. मां० उ० ८-१२

४. छां० उ० ८.३.३

Digitization by Arya Samaj Charitable Foundation, Chennai

१.५.४ आख्यायिका-प्रविधिः ।

एष प्रविधिः उपनिषत्सु भूयो भूयः अनुसृतो दृश्यते । कदाचित् विनयादि-चारित्रं शिक्षयितुमपि एष प्रविधिः उपयुक्तो दृश्यते । यथा केनोपनिषदि उमायाः हैमवत्याः इन्द्रस्य च आख्यायिका ब्रह्मत्तेजिज्ञासोः विनयसम्पन्नेः आवश्यकताम् उपदिशति । उपनिषदुपदेशानां प्राशस्त्यवर्णनार्थमपि आख्यायिकाप्रविधिः आश्रितः । यथा इन्द्रियाणां सर्वेषाम् अहमेव ज्येष्ठश्च श्रेष्ठश्च इति विवदमानानां ब्रह्म प्रति गमनम् आख्यातं छान्दोग्ये[१] । कठोपनिषदि नचिकेतसः आख्यायिका विद्यास्तुत्यर्था[२] । एवमाख्यायिकाः बह्व्यः बहुविधाः बहुप्रयोजनाश्च उपनिषत्सु भूयो भूयः प्रस्तूयन्ते ।

१.५.५ सादृश्य-प्रविधिः ।

एष प्रविधिः अपि पूर्वतन इव उपनिषत्सु अत्यन्तं प्रचुरतया अनुवर्तितः । वस्तुतः ये खलु विचाराः शब्दसाहाय्येन स्पष्टं बोधयितुमशक्याः तेऽपि सादृश्य-दर्शनमात्रेण स्पष्टं बोधयितुं शक्याः भवन्ति । याज्ञवल्क्यः मैत्रेय्यै दुन्दुभेः, शङ्खस्य, वीणायाश्च सादृश्येन अद्वैतात्मविज्ञानमुपदिदेश[३] । एवं छान्दोग्ये आरुणिः मधु-मक्षिकाभिः विविधेभ्यः पुष्पेभ्यः समाहृतानां रसानां मधुनि एकरसताप्राप्ति, तथा विविधाभ्यः दिग्भ्यः स्यन्दमानानां नदीनां समुद्रे एकरूपताप्राप्तिं च उपमीय सति सम्पन्नानां भेदानुभवाभावं समर्थयति[४] । एवं सुबहूनि उपमानानि उपदेशार्थम् उपयुक्तानि । वस्तुतः उपदेशप्रविधिषु एष मूर्धन्यः इति वक्तुं शक्नुमः ।

१.५.६ वादप्रविधिः ।

वाकोवाक्यप्रविधिः इत्यपि व्यवहर्तुं शक्नुमः । एष प्रविधिः अत्यधिकतया प्रयुक्तः उपनिषत्सु । वस्तुतः सर्वोऽपि प्रधानः उपनिषदां विचारः संवादात्मकतया

---

१. छां.उ.५.१.६-१५

२. शङ्करभगवत्पादाः,उपनिषद्भाष्यम्,उदाहृतपूर्वम्,खण्डः१,पृ.५८

३. बृ० उ० २.४.१-१४

४. छां० उ० ६.९;६.१०

Digitization by Arya Samaj Charitable Foundation, Chennai

एव प्रस्तुतः । यथा खलु बृहदारण्यके द्वितीयतृतीयाध्याययोः जनकसभायां प्रवृत्तः संवादः याज्ञवल्क्येन तत्पत्न्यै कृताः उपदेशाश्च उदाहरणमर्हन्ति ।

१.५.७ समन्वय-प्रविधिः ।

परिषत्सु बहुभिः ऋषिभिः कृतान् प्रस्तावान् कदाचित् तदन्यतमः अविरोधेन समन्वीय सिद्धान्तयति । यथा छान्दोग्ये सृष्टिविषये विवदमानानां षण्णां मतानि समन्वीय कैकेयः अश्वपतिः सिद्धान्तयाञ्चकार[१] । एवं पिप्पलादः षण्णां ऋषीणां मतानि समन्वीय सिद्धान्तमाविष्कृणोति प्रश्नोपनिषदि । तथा बृहदारण्यके चतुर्थाध्याये राज्ञा जनकेन प्रस्तुतानां षण्णाम् आध्यात्मिकविचाराणां समन्वयः याज्ञवल्क्येन महर्षिणा कृतो दृश्यते ।

१.५.८ स्वगतभाषण-प्रविधिः ।

पूर्वं विचारितस्य वादप्रविधेः विलक्षणतया, कदाचित् कश्चित् ऋषिः आत्मानं विस्मृत्य, स्वात्मगतरूपेण विचारान् प्रवर्तयामास इति अनुभवामः । यथा बृहदारण्यके अन्तर्यामिब्राह्मणे याज्ञवल्क्यः[२] । स एव जनकेन संवादसमये चतुर्थे अध्याये[३] । एवं कठोपनिषदि नचिकेतसः तृतीयप्रश्नस्य समाधानं यच्छन् यमः प्रश्नादप्यधिकं स्वगतरूपं बहुदीर्घम् उपदिदेश[४] ।

१.५.९ तात्कालिकोत्तरप्रविधिः ।

क्वचिदुपनिषत्सु तात्कालिकानि उत्तराणि दीयमानानि अनुभवामः । यथा—इन्द्रविरोचनाख्यायिकायां तयोः प्रश्नस्य पूर्णं समाधानम् अनुक्त्वा, तादात्विकं किञ्चित् समाधानं प्रजापतिः दत्तवान् । तेनैव तृप्तः विरोचनः न पुनरागच्छत् । इन्द्रस्तु अनेकवारं तपः कर्तुम् आदिष्टः सन्, भूयो भूयः उपसद्य अन्ते ब्रह्मणः उपदेशं प्राप्तवानिति आख्यायते[५] ।

---

१. छां. उ. पञ्चमाध्याये एकादशतमात् खण्डात् अष्टादशखण्डपर्यन्तम्

२. बृ० उ० तृतीयाध्याये सप्तमं ब्राह्मणम् ।

३. बृ० उ० ४.३-४

४. कठ. उ. प्रथमाध्यायस्य द्विदीयवल्लीतः आन्तम् ।

५. छां० उ० अष्टमाध्याये सप्तमात् खण्डात् आन्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

१.५.१० प्रश्नोत्तरप्रविधिः।

एषः अपि प्रविधिः बहुषु स्थलेषु अनुसृतो दृश्यते। अस्मिन् पूर्वप्रश्नस्य यत् उत्तरं तदधिकृत्य पुनः स एव प्रश्नः क्रियते। एवं बहुदूरं यावत् पशनपरम्परायाः नयनानन्तरम् अन्तिमम् उत्तरं ज्ञातं भवति। यथा बृहदारण्यके जनकयाज्ञवल्क्य-संवादे[१]। यथा वा तत्रैव गार्गि-याज्ञवल्क्यसंवादे[२]। "अथ हैनं गार्गी वाचक्नवी पप्रच्छ, याज्ञवल्क्येति होवाच। यदिदं सर्वमप्स्वोतं च प्रोतं च, कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति, वायौ गार्गीति।...कस्मिन्नु खलु ब्रह्मलोकाः ओताश्च प्रोताश्चेति, स होवाच, गार्गि ! मातिप्राक्षीः, मा ते मूर्धा व्यपप्तत्। अनतिप्रश्न्यां वै देवतामति-पृच्छसि गार्गि ! माति प्राक्षीरिति। ततो ह गार्गी वाचक्नव्युपरराम।" इति।

एतदतिरिक्ताः अपि केचन अत्यन्तप्रधानाः प्रविधयः उपनिषत्सु उपदेशार्थं परिगृहीताः इति वयं मन्यामहे। उदाहरणार्थम् अध्यारोपापवादप्रविधिः, कार्यात्का-रणग्रहणप्रविधिः, नेतिनेति प्रविधिः इत्यादयः।

१.५.११ अध्यारोपापवादप्रविधिः।

अनेकासु उपनिषत्सु जगतः सृष्टि-प्रलयौ वैशद्येन विविधतया उपवर्ण्येते। स एष सर्वोऽपि विचारः सृष्टिप्रलयौ उपवर्णयितुमेव न, किन्तु निर्गुणस्य, निर्धर्मकस्य, अद्वितीयस्य ब्रह्मणः वाचामगोचरतया, तादृशे तस्मिन् सृष्ट्युपवर्णनद्वारा मिथ्याभू-तान् धर्मानारोप्य अनन्तरं "नेति-नेति" इत्युपदेशप्रक्रियया कल्पितधर्माणाम् अपव-दनेन शुद्धं निर्गुणं च ब्रह्म बोधयितुमेव सृष्टिप्रलयौ उपवर्णितौ।

१.५.१२ "नेति-नेति"-प्रविधिः।

उपनिषत्सु "नेति-नेति" इत्युपदेशद्वारा ब्रह्म बोध्यते। किञ्च "अस्थूलम्, अनणु, अह्रस्वम्, अदीर्घम्" इत्यादिना निषेधमुखेन च ब्रह्म बोध्यते। तत्र कारणं तावत् ब्रह्मणः निर्गुणत्वात् निर्धर्मकत्वात् च विधिमुखेन उपनिषद्भिः उपवर्णयितुं न शक्यं ब्रह्म। अतः उपनिषत् वागतीतस्यापि अस्य ब्रह्मणः उपवर्णनार्थम् उपाया-

---

१. बृहदारण्यकं, चतुर्थाध्यायस्यादौ

२. तत्रैव, तृतीयाध्याये षष्ठं ब्राह्मणम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न्तरम् अन्विष्टवती। स एव तस्मिन् ब्रह्मणि समस्तगुणानां धर्माणाञ्च निषेधकरण-रूपः। अनेन च प्रविधिना निर्गुणं निर्धर्मकमपि ब्रह्म उपनिषदा प्रतिबोधयितुं योग्यं भवति।

१.५.१३ कार्यात्कारणग्रहण-प्रविधिः।

छान्दोग्ये श्रूयते, "...एवमेव खलु सोम्यान्नेन शुङ्गेन अपो मूलमन्विच्छ; अद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ; तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ, सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः[१]।" इति। अत्र कार्यभूतेन अन्नशुङ्गेन तन्मूलभूताः आपः प्रतिपत्तव्याः इति उपनिषदुपदिशति। एष औपनिषदः विचारः अनन्तरं दर्शनक्षेत्रे सुविस्तृतया विचारितायाः कार्यात्कारणानुमानप्रक्रियायाः बीज-भूतः आसीदिति वयं तर्कयामः।

१. छां० उ० ६.८.३

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वितीयाध्यायः

शरीरं च शारीरं च

ब्रह्मविद्यात्वेन प्रसिद्धासु उपनिषत्सु ब्रह्म मोक्षः जीवब्रह्मणोः ऐक्यम् इत्यादि विचारैः सह जीवः, अन्तःकरणं, मनः, बुद्धिः चित्तम्, अहङ्कारः, इन्द्रियाणि, देहः इत्यादयोऽपि ऐहिकाः विचाराः शतशः कृताः दृश्यन्ते । विशिष्य च आन्तरप्रपञ्च-भूत-मनो-बुद्ध्य-हङ्कार-चित्तानां विषये एतासु कृताः विचाराः अतीव गम्भीराः, अद्यतनीनमनोविज्ञानसिद्धैः सिद्धान्तैः समतुलाः प्रकाशन्ते । समग्रे जगति अत्यन्त-प्राचीनग्रन्थत्वेन सर्वैरङ्गीकृतासु एतासु उपनिषत्सु अद्यतन वैज्ञानिकान्वेषण सिद्धानां तत्त्वानां साक्षात्कारः चकितान् अस्मान् विधत्ते । किन्तु इदमपि मनसि धर्तव्यं यत् प्रायः सार्धद्विसहस्रवर्षेभ्यः प्राक् आविष्कृतेषु एतेषु विचारेषु एतेषां सिद्धान्तानां साङ्गोपाङ्गव्याख्यानं वा विवरणं वा प्रतीक्षितुं न शक्यते । किञ्च तत्त्वसाक्षात्कारे तेषां कीदृशाः प्रविधयः तेषु दिवसेषु तेषामासन्निति च वयं न जानीमः । तथापि विज्ञान-सम्बन्धिनः केचन विचाराः स्पष्टरूपेण आविष्कृताः आसन्निति तु सत्यम् ।

वस्तुतः उपनिषदृषीणां सम्मुखे प्रधानं प्रश्नद्वयमासीत् । तयोः एकः तावत् शरीरं शारीरांश्च पदार्थान् अधिकृत्य । द्वितीयस्तावत् शरीरात् बहिः विद्यमानं सर्वं जगदधिकृत्य । स्थूलतया वयमेवं वक्तुं शक्नुमः यत् ते आन्तरं प्रपञ्चं, बाह्यं प्रपञ्चं च विचार्याधीत्य, तादृशाध्ययनसिद्धैः फलैः प्रपञ्चद्वयस्य रहस्यं विज्ञाय; तयोः सम्बन्धं समन्वयं च साधयित्वा, अनन्तरं उभयप्रपञ्चयोः उपशमार्थं मार्गमन्विष्ट-वन्तः । स्थूलतः उपनिषत्सु प्रतिपादिताः सर्वे विचाराः एतेषु त्रिषु चतुर्षु वा विभागेषु अन्तर्गताः भवन्त्येव । अत एव च वैज्ञानिकाः अपि केचन विचाराः एतासु दृश्यन्ते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यद्यप्येते उपनिषदां प्रधानप्रतिपाद्याः न भवन्ति, तथापि भवन्ति अवश्यप्रतिपाद्याः । अतः किञ्चिदिवात्र तादृशान् विचारान् आलोचयामः ।

२.१. जन्मत्रयम् ।

"पुरुषे ह वा अयमादितो गर्भो भवति यदेतत् रेतः । तदेतत् सर्वेभ्योऽङ्गेभ्यः तेजस्सम्भूतम् आत्मन्येवात्मानं बिभर्ति । तद्यदा स्त्रियां सिञ्चति, अथैनज्जनयति तदस्य प्रथमं जन्म । तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति ! साऽस्यैतमात्मानमत्र गतं भावयति । सा भावयित्री भावयितव्या भवति, तं स्त्री गर्भं बिभर्ति ।....तदस्य द्वितीयं जन्म । सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते । अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति । स इतः प्रयन्नेव पुनर्जायते । तदस्य तृतीयं जन्म[1] ।"

मन्त्रष्वेतेषु पुरुषस्य जन्मत्रयं निरूपितमस्ति । पितुः शरीरे एव पुरुषस्य प्रथमजन्म भवतीति कथनं लोकसिद्धसामान्याभिप्रायस्य अपवादात्मकं भवति । किञ्च, स्त्रीगर्भे प्रवेशस्य समसमयमेव प्रथमजन्मनः कथनात्, तदारभ्यैव जीवनं गर्भस्य भवतीति सिद्धयति । विज्ञानिनः अङ्गीकुर्वन्ति वा न वा, महर्षेः अयमभिप्रायः । किञ्च, पुरुषेण स्थापितो गर्भः स्वस्याङ्गमिव आत्मभूतं भवति इति, तथा गर्भिणी स्त्री रक्षयितव्या पोषयितव्या चेति कथनं महत्त्वपूर्णम्; अस्माकं सदाचारे प्रतिष्ठितं च । प्रायः अस्माकं शरीरं तदन्तः अन्यस्य कस्यापि शरीरस्य स्थितिं न सहते । किन्तु गर्भस्य कथा तु भिन्ना । स्त्रीगर्भतः कुमारस्योत्पत्तिः द्वितीयं जन्म । जातस्य तस्य वयसि गते सति मरणानन्तरं पुनरन्यत्रोत्पत्तिः तृतीयं जन्म इति जन्मत्रयम् ।

२.२ पाङ्क्तं सर्वम् ।

"स एष पांक्तो यज्ञः, पांक्तः पशुः, पांक्तः पुरुषः, पांक्तम् इदं सर्वं यदिदं किञ्च[2] ।"

---

१. ऐ० उ० २.१-४

२. बृ० उ० १.४.१७

Digitization by Arya Samaj Charitable Foundation, Chennai

"पृथिव्यन्तरिक्षं द्यौर्दिशोवान्तरदिशाः ।अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्तपतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदानस्समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म मांसं स्नावास्थि-मज्जा । एतदधिविधाय ऋषिरवोचत् । पांक्तं वा इदं सर्वं, पांक्तेनैव पांक्तं स्पृणोतीति[१] ।"

अत्र खलु बहिः दृश्यमानस्य प्रपञ्चस्य एवम् आन्तरस्य च प्रपञ्चस्य च पाञ्चप्रकृतिकत्वं स्पष्टीक्रियते । चर्म, मांसं, स्नावाः, अस्थि, मज्जा, इति उपवर्णनं शरीरावयवानां परीक्षणनैपुण्यं (anotomy) विज्ञानं च स्पष्टयति ।

२.३. पञ्चीकरणं त्रिवृत्करणं च ।

एवमेव शरीराणि सर्वाणि पाञ्चभौतिकानि इति उपनिषत् प्रकटयति । किञ्च प्रत्येकं पृथिव्यादिकं स्थूलभूतमपि जलादिसूक्ष्मभूतान्तराणाम् अष्टमैः भागैः समन्वितमेवेति पञ्चीकरणप्रक्रियायां निरूपयति उपनिषत् । स्थूलपृथिवी नाम सूक्ष्मपृथिव्याः अर्धांशः, इतरेषां जलादीनां चतुर्णां सूक्ष्मभूतानां अष्टमभागचतुष्टयमेलनेन यः इतरार्धांशः, तेन सहितः सन् सञ्जायते । एतेनेदमुक्तं भवतिं यत् प्रत्येकस्मिन्नपि स्थूलभूते इतरेषां भूतानाम् अंशाः सम्मिलिताः सन्ति इति । एवमङ्गीकारः पृथिव्यादिषु प्रत्यक्षसिद्ध-इतरभूत-सन्निवेशं समर्थयन् उपनिषदृषेः क्रान्तदर्शित्वं ख्यापयति । तथाहि । "सत्त्वेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत । तत्तेज ऐक्षत बहु स्यां प्रजायेयेति । तदपोऽसृजत ।...अन्नमसृजन्त[२] ।"

"सेऽयं देवतैक्षत; हन्ताहमिमास्तिस्रो देवताः अनेन जीवेन आत्मना अनुप्रविश्य, नामरूपे व्याकरवाणि । तासां त्रिवृतं त्रिवृतं एकैकां करवाणीति[३] ।"

१. तै० उ० १.७

२. छा० उ० २.१.४

३. छा० उ० ६.३.२.३

Digitization by Arya Samaj Charitable Foundation, Chennai

२५४ BVBSSMV

"यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्य, अपागादग्नेरग्नित्वं, वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्[१] ।..."

एवं छान्दोग्योपनिषदि त्रयाणामेव सूक्ष्मभूतानामुत्पत्तिं कथयित्वा त्रिवृत्करणप्रक्रियाद्वारा स्थूलभूतत्रयस्योत्पत्तिः कथ्यते । तैत्तिरीयके तु पञ्चानां सूक्ष्मभूतानाम् उत्पत्तिः कथिता । अत एव तदनुसारेण पञ्चीकरणप्रक्रिया वेदान्ते अनुसृता । "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी[२] ।"

भौतिकानि शरीराणि चतुर्विधानि । जरायुज, अण्डज, उद्भिज्ज, स्वेदजानिति । तान्येतानि सर्वाण्यपि पाञ्चभौतिकान्येव ।

२.४. शरीराणि-शरीरावयवाश्च ।

उपनिषत्सु शरीरस्य शरीरावयवानाञ्च उपवर्णनं वैशद्येन उपलभ्यते । न केवलं मनुष्यशरीरस्य, अपि तु पशूनां वृक्षाणामपि शरीराणां तदवयवानाञ्च कीर्तनं तत्र तत्र उपलभ्यते । पशुयागानां अनुष्ठानसामर्थ्यात् एतत् शारीरं विज्ञानं तैः प्राप्तं स्यादिति तर्कयामः । शङ्करभगवत्पादाः अपि "हृदयमिति पुण्डरीकाकारो मांसपिण्डः प्राणायतनः अनेकनाडीसुषिरः, ऊर्ध्वनालः अधोमुखः **विशस्यमाने पशौ प्रसिद्धः** उपलभ्यते" इति स्पष्टं कथयन्ति[३] ।

"उषा वा अश्वस्य मेध्यस्य शिरः ...वागेवास्य वाक्[४] ।"

मन्त्रेऽस्मिन् पशोः कतिचनाङ्गानां कीर्तनं दृश्यते । तानि च शिरः, चक्षुः, प्राणः, व्यात्तम् (विवृतं मुखम्) आत्मा, पृष्ठम्, उदरम्, पाजस्यम् = पादस्यम् = पादासनस्थानम्, पार्श्वे, पर्शवः = पार्श्वास्थीनि, अङ्गानि, पर्वाणि, प्रतिष्ठाः = पादाः, अस्थीनि,

१. छा० उ० ६.४.१-४

२. तै० उ० २.१

३. तै० उ० १.६.१. मन्त्रस्य भाष्ये । एस्० सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, उदाहृतपूर्वम् । प्रथम भागः, पृ. ४०२

४. बृ० उ० १.१.१

Digitization by Arya Samaj Charitable Foundation, Chennai

मांसानि, ऊवध्यम् = उदरस्थम् अर्धजीर्णम् अशनम् । गुदाः = नाड्यः, यकृत् च क्लोमानः च = हृदयस्याधस्तात् दक्षिणोत्तरौ मांसखण्डौ, लोमानि, केशाः, पूर्वार्धः = नाभेः ऊर्ध्वम्, जघनार्धः = अपरार्धः, विजृम्भणं = गात्राणां विनामनं, विक्षेपणं च, विधूननम् = गात्राणां कम्पनम्, मेहनम् = मूत्रकरणं वाक् इतीमानि ।

एवम् अन्यत्र वृक्षस्यावयवाः कीर्तिताः—"यथा वृक्षो वनस्पतिः तथैव पुरुषोऽमृषा । तस्य लोमानि पर्णानि, त्वगस्योत्पाटिका बहिः ।...वृक्णः कस्मान्मूलात् प्ररोहति[1] ।" अत्र पर्णानि, उत्पाटिका = बहिः त्वक्, उत्पटः = वृक्षनिर्यासः, शकराणि = शकलानि, किनाटं = शकलेभ्यः अभ्यन्तरं काष्ठसंलग्नं वल्कलरूपं द्रव्यम्, दारूणि = किनाटस्याभ्यन्तराणि काष्ठानि, मज्जा इत्येते वृक्षशरीरस्यावयवाः कीर्तिताः । न केवलम् एतत् । मन्त्रेऽस्मिन् वृक्षशरीरस्य पुरुषशरीरस्य च उपमा कृता समानैः अवयवैः । एतेनेदं सिद्ध्यति यत् उपनिषदृषेः दृष्टौ उभावपि वृक्षपुरुषौ जीवन्तौ सचेतनौ पदार्थौ, परस्परम् अवयवसाम्यवन्तौ च इति । एषा धारणा अद्यतनीनविज्ञानिभिः इदमिदानीम् आसादिता ।

स्पष्टं चान्यत्र वदति ऋषिः—

"एष ब्रह्मा, एष इन्द्रः, एष प्रजापतिः एते सर्वे देवाः, इमानि च पञ्च महाभूतानि, पृथिवी, वायुः, आकाशः आपः, ज्योतींषीत्येतानि, इमानि च क्षुद्रमिश्राणीव बीजानि, इतराणि चेतराणि चाण्डजानि च, जारुजानि च, स्वेदजानि च, उद्भिज्जानि च, अश्वा, गावः, पुरुषाः, हस्तिनः, यत्किञ्चेदं प्राणि जङ्गमं च, पतत्रि च, यच्च स्थावरम् । सर्वं तत् प्रज्ञानेत्रम् । प्रज्ञाने प्रतिष्ठितम् । प्रज्ञानेत्रो लोकः । प्रज्ञा प्रतिष्ठा । प्रज्ञानं ब्रह्म[2] ।"

"अस्य सौम्य महतो वृक्षस्य यो मूलेऽभ्याहन्यात् जीवन् स्रवेत् । यो मध्येऽभ्याहन्यात्, जीवन् स्रवेत् । योऽग्रेऽभ्याहन्यात्, जीवन् स्रवेत् । स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानः तिष्ठति । अस्य यदेकां शाखां जीवो जहाति, अथ सा शुष्यति । द्वितीयां जहाति, अथ सा शुष्यति । तृतीयां जहाति, अथ सा

१. बृ० उ० ३.९.२८.१-६

२. ऐ० उ० ३.३

Digitization by Arya Samaj Charitable Foundation, Chennai

मधुवर्षणं करोति। पृथ्वी मधुमती आकाशे या सर्वेषां रक्षकः, सोऽपि मधुमान्। सूर्यो मधुमान् तस्य रश्मयो मधुमत्यः सन्ति। तथाहि मन्त्राः।

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः
माध्वीर्नः सन्त्वोषधीः॥

मधुनक्तमुतोषसो मधुमत् पार्थिवँ रजः।
मधु द्यौरस्तु नः पिता॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य्यः।
माध्वीर्गावो भवन्तु नः॥

ऋ० १-९०-६, ७, ८

सामूहिकानन्दस्य धारणैव वैदिकसंस्कृतेर्मूलभित्तिः। वेदस्य ज्ञानस्य प्राकृतिकविकास एव चरमपरिणतिः सम्भवति आनन्ददर्शने।

सामूहिकसुखसाधनाविकासार्थं यावत्कृतं वैदिकयुगेन तदविस्मरणीयम्। वैदिकजीवनादर्शस्य पूर्णपरिपाकः संभवत्यस्मिन् सार्वजनीनमङ्गले। उदाहरणार्थम्, ऋग्वेदस्य चरमसूक्तं संज्ञानसूक्तनामकमुद्धरणीयमस्ति। सहैव चल। संमिल्य संभाषणं कुरु। संमिल्यैव विचारं जानीहि। आचारे विचारे वचने च सर्वेषां समानः समधिगमो भवतु। यथा प्राचीनकाले विद्वांसः संमिल्य स्वाचरणं कुर्वन्ति स्म, तथैव त्वमपि कुरु। सर्वेषां विचारः सर्वेषां कृते समानरूपेण हितानुबन्धी भवतु, कदापि विरोधभाक् न भवेत्। समूहे सर्वेषां समता तिष्ठेत्, कदापि विषमता न भवेत्। सर्वेषां मनसि समभावः सदा जाग्रतु, कदापि विषमता नो तिष्ठतु, यज्ञस्य सर्वा सामग्री सर्वेषां समक्षे सुलभा भवेत्। सर्वे संमिल्य एकस्मिन्नेव यज्ञे सम्मिलिता भवेयुः। सर्वे एकीभूय यज्ञसम्पादनं कुर्युः। सर्वेषामध्यवसायः समानो भवतु, हृदयं समानमस्तु, मनः समानं भवतु। एवं प्रकारेण सर्वस्यैक्यं सम्भवतु। परस्परं कदापि विरोधो न भवेत्। संज्ञानमन्त्राणि सन्ति—

संगच्छध्वं संवदध्वं संवो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते॥

समानो मन्त्रः समितिः समानी
समानं मनः सह चित्तमेषाम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

समानं मन्त्रमभिमन्त्रये वः ।
समानेन वो हविषा जुहोमि ॥

समानी व आकूतिः
समाना हृदयानि वः ।

समानमस्तु वो मनः
यथा वः सुहासतिः ॥

ऋ० १०-१९१-२, ३, ४

एकस्य वेदना, अस्य वेदना । तथैव एकस्य सुखमपरस्य सुखम्—अत्रैव मानवकल्याणमस्ति । अयमेवाधुनिकमानवसमाजानां कृते ऋग्वेदस्य सार्वभौमः सन्देशो वर्त्तते । तदर्थं वयं गौरवान्विता भवेम । ऋग्वेदस्य प्रदीप्तोऽयं दीपः यथा न निर्वातु तथैवास्माकं सततं प्रयत्नो भवेदिति ।

अध्यात्मदर्शनोपलब्धिर्ब्रह्मसायुज्य एव वर्तते । 'सा काष्ठा सा परागतिः'—'नान्यः पन्था विद्यते अयनाय'—तथा च मन्त्रः—

योऽस्य पारे रजतः
शुक्राग्नि अजायत ।
स नः पर्षदति द्विषः ॥

ऋ० १०-१८७-५

तथा च—

शुक्राग्निरेव ब्रह्मज्योतिः । तेन हि—

यच्छुक्रं महज्योति दींप्यभानं महद् यशः ।
तद्वै देवा उपासते तस्मात् सूर्य्यो विराजते ।

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

इति शम्

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थोऽध्यायः

सामसंहिता—सामवेदः

गीतायां भगवता श्रीकृष्णेन गीतम् **वेदानां सामवेदोऽस्मि।**

तथा च—

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।

अयं कश्चिन स्वतंत्रग्रन्थो नास्ति। अस्याधिकांशमन्त्रा ऋग्वेदस्यैव सन्ति। सामसंहितायामपमलब्धेषु १८७५ संख्याकमन्त्रेषु १७७९ मंन्त्रा ऋग्वेदस्यैवाविकलरूपेण गृहीताः सन्ति। केवलं पञ्चाधिकैकशतसंख्यका एव नवीनाः विद्यन्तोतेष्वपि पञ्चमन्त्राः पुनरुक्ता एव। एवञ्च सामसंहितायां नवनवतिमन्त्रा एव नवीनाः सन्ति।

तस्माद् वक्तुं शक्यते यदृक्सामयोः पारस्परिकसम्बन्धो निविडः; सामवेदस्याधार एव ऋक्संहिता। उभयमध्ये दाम्पत्यभावस्य कल्पना कृता वर्त्तते तथा च बृहदारण्यकोपनिषदि (९-४-२०)- सन्तानोत्पादनाय मदनभूमिकायाः सृजनावसरे कथनमस्ति-

अमोऽहमस्मि, सात्वम्। सामाहमस्मि, ऋक्त्वं, द्यौरहं पृथ्वीत्वम्। ताविह संभवीव, प्रजामाजनयावहै।

पतिः पत्नीं प्रति कथयति,- अहं सामरूपः पतिरस्मि, त्वञ्च ऋग्रूपा पत्नी। अहमाकाशः, त्वञ्च पृथ्वी। अति आगच्छ। सहैवापत्योत्पत्ति करवावहै।

सामशब्दस्य मूलार्थो भवति प्रियवचनम्। 'सो' धातोर्निष्पन्नः शब्दः 'साम' मधुरवचनमिति। 'स्वरः सामशब्देन लोकेऽभिधीयते। सुसामा देवदत्त इति सस्वरो देवदत्त इति। स्वरो घोषो नाद इति समानार्थाः। स सामशब्देनोच्यते, इति शतपथब्राह्मणवाक्यानि। एवञ्च यज्ञकाले भक्तिभावेन परमात्मनो विभूतीनां समताललययुक्तेन स्वरेण सह गुणाख्यानं साम भवंति। प्रस्तौता साम प्रस्तौति। तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

चोक्तं शतपथब्राह्मणे सस्तोमस्वरकलाभ्यासविकारायां हिङ्कारप्रणवप्रस्तावोद्गीथ-प्रतिहारोपद्रवनिधनवत्यामृचि गीतौ सामशब्दोऽभियुक्तैरुपचर्यते। सामगानकर्त्ता उदगाता तथा च तत्कार्यमौद्गात्रम् व्यवह्रियते। सामशब्दस्य स्पष्टां निरुक्तिर्बृहदा-रण्यकोपनिर्षाद प्राप्यते। 'सा' इति सर्वनामपदम् ऋगर्थे प्रयुक्तं वर्त्तते; 'अम्' इत्युत्तरपदस्यार्थो गान्धारादिषड्जस्वरः।

सा च अमश्चेति तत्साम्नः सामत्वम्।

बृ. उप. १-३-२२

तथा सति सामशब्दस्य वेदमूलार्थः स्वरप्रधानगायनोपयोगिनाम् ऋग्मन्त्राणां संकलनमिति। छान्दोग्योपनिषदोवाक्यमस्ति ऋचि अध्यूढं साम। **'गीतिषु सामाख्या'** इति जैमनीयसूत्रेणैतत्तत्वस्योद्घाटनं भवति।

साममन्त्राणां रचना प्रायशो गायत्रीप्रगाथछन्दसोरभूत्। गायत्रीप्रगाथछन्दस आत्मा गेयताऽस्ति। गायत्रीछन्दसि त्रयः पादा भवन्ति। प्रतिपादमष्टाक्षराणि सन्ति। एवञ्च नियमतः त्रिपदाया अष्टाक्षराया गायत्र्या अक्षराणां संख्या चतुर्विंशतिका भवति। कादाचित्करूपेण किस्मिंश्चित् पादे अक्षरमेकं न्यूनं भवति, क्वचिच्च अक्षरमेकमधिकमपि भवति। त्रयोविंशत्यक्षराणां गायत्री 'निचृद् गायत्री' तथा च पञ्चविंशत्यक्षराणां 'भूरिग् गायत्री' कथ्येते। प्रगाथछन्दो हि गायत्रीजगतीछन्दसः संमिश्रणं भवति। छन्दोद्वयरचनायां भारतीयामरगायका या मधुररागरागिनी व्यवा-हरन्, ता अद्यापि गीतकाव्यस्यामरवाण्यः सन्ति।

सामवेदस्यानेकाः शाखाः प्रतिपादिताः सन्ति, पातञ्जालमहाभाष्यसूत-संहिता-मुण्डकोपनिषत्-स्कन्दपुराणादिग्रन्थेषु सामवेदस्यैकसहस्त्रशाखाणामुल्लेखो वर्त्तते। इतिहासकारैः पुराणेषु विष्णुपुराणस्य सर्वाधिकप्रमाणिकत्वं स्वीकृतमस्ति। तत्र कथाप्रसंङ्गे कथितोऽस्ति यद् वेदव्यासः स्वशिष्यं काण्डर्षिजैमिनिं सामवेदस्य शिक्षामुपादिशत्। जैमिनिः सामवेदं भागद्वयमकरोत्। स भागमेकं स्वपुत्रं सुमन्तु-मपाठयत् तथा च द्वितीयभागं स्वपौत्रं सुकर्माणम्। पुत्रपौत्रौ च सामवेदस्याध्ययनार्थं स्वतन्त्रसरणिमचालयताम्। तत्राधिकं श्रेयः सुकर्मण एवाभवत्। सुकर्मणः शिष्यो हिरण्यनाभः सामवेदं पञ्चदशभागेषु विभज्य प्रतिभागं प्रतिशिष्यमपाठयत्। ते शिष्या 'उदीच्य-सामगाः' प्रथिताः परवर्त्तिकाले। एवञ्च पौष्यञ्जिनामर्षेः लौगाक्षि-कुथुमि-कुसीदि-लाङ्गल्यादिनामकाः शिष्याः च हिरण्यनाभोपदिष्टसामसरणीनाम-ध्यनमकुर्वन् ते प्राच्यसामगरूपेणाभिहिताः सन्ति। हिरण्यनाभस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

कृतिनामनामकशिष्यो यश्च गुरोः सामवेदज्ञानं प्राप्तवान्, स्वसामवेदज्ञानं पञ्चविंशतिशिष्यान् पाठयामास। इत्थं सामवेदस्य विविधाः शाखा अभूवन्। यासु शाखासु मूलभूत-स्वतन्त्रज्ञानमासीत्, ता एव सुरक्षिता अतिष्ठन्। अवशिष्टास्तु विस्मृतिगर्त्ते विलीना अभूवन्। **चरणव्यूहपरिशिष्टसूत्रे महर्षि शौनक** उपर्युक्तं तथ्यं कथारूपेण निर्दिष्टमकरोत्। तत्रोक्तं महर्षिणा— सामवेदस्य किल सहस्रभेदा भवन्त्येष्वनध्यायेष्वधीयानाराते शतक्रतुवज्रेणाभिहताः।

सहस्रशाखाः सामवेदस्य भवन्ति। आस्वनेका अनध्यायेऽध्ययनाद् इन्द्रो हि स्ववज्रप्रहारेण विनष्टाः कृतवानिति।

तथाहि दिव्यावदान-चरणव्यूहजैमिनिगृह्यसूत्रादिग्रन्थानामनुशीलनेन सामवेदस्य त्रयोदशशाखानां सङ्केतः प्राप्यते। सामतर्पणावसरे त्रयोदशाचार्यणां नामानि प्राप्यन्ते तानि च सन्ति—राणायन-सत्यमुग्र-व्यास-भागुरि-औलुण्डि-गौल्मुलविभानुमानौपमन्यव-काराटि-मशकगार्ग्य-वार्षगण्य-कौथुमि-शालिहोत्र-जैमिनय इति। यथोक्तं राणायन-सत्यमुग्र-व्यास-भागुरि-औलुण्डि-गौल्मुलविभानुमानौपमन्यव-काराटि-मशक गार्ग्यवार्षगण्य-कौथुमि-शालिहोत्र-जैमिनि त्रयोदशैते मे सामगाचार्याः स्वस्तिं कुर्वन्तु तर्पिताः। परमिदानींतनकाले एषु त्रयोदशाचार्याणां मध्ये केवलं कौथुमि-राणायन-जैमिनीनामेव शाखा उपलब्धा सन्ति। आस्वेव कौथुमीया शाखा सर्वाभ्यः प्रचुरप्रचलिता तथा चोपादेयाऽस्ति। एनां राणायनीयसंहितामवलम्ब्य सायणस्य भाष्यं प्राप्तमस्ति। राणायनीयाशाखा कौथुमीयशाखा समाना वर्त्तते। मन्त्र-संख्याऽपि समाना। केवलमुच्चारणविधिरेव विभिन्नोऽस्ति। कौथुमशाखाया 'हा उ' इत्यस्य स्थाने राणायनीय शाखायां 'हा वु' इत्युच्चारो भवति। तथैव कौथुमस्य 'राह' राणायनीय शाखायां 'राई' इत्युच्चारितो भवति। पुनश्चोभयो र्मन्त्रगणनाऽपि विभिन्ना वर्त्तते। राणायनीयपद्धत्यां मन्त्राणां गणना प्रपाठकार्धप्रपाठकादिदशविधा भवति, कौथुम-शाखायां मन्त्राणामुपन्यासोऽध्याये खण्डे च विद्यते।

जैमिनीयसंहिताया अपरं नाम 'तवलकार' इति। प्रसिद्धा केनोपनिषद् अनया शाखयैव सम्बद्धा वर्त्तते। जैमिनीयसंहितायां मन्त्रसंख्या न्यूना सत्यामपि सामगानसंख्या पूर्वोक्तशाखाद्वयापेक्षयाधिका प्राप्यते।

सामशाखासु कौथुमीयशाखा साम्प्रतमपि सुप्रतिष्ठिता वर्त्तते। गुर्जरजनपदे अद्यापि श्रीमालिनागरब्राह्मणेषु कौथुमसंहितायाः समादरो अत्यधिकं भवति।

Digitization by Arya Samaj Charitable Foundation, Chennai

कौथुमसामसंहिताया द्वौ भागौ स्तः- आर्चिकं गानञ्च । पूर्वमेवोक्तं यदृक् स्वरस्तोभादिविशिष्टैव साम । एतादृश्या ऋचः पारिभाषिकं नाम 'सोमयोनिः' केवलं योनिः इति । आर्चिकं सोमयोनीनां संग्रहः तथा च गानं तन्मन्त्राणां स्वरसंधानं भवति ।

आर्चिकं द्विरूपं प्राप्यते- पूर्वार्चिक-मुत्तरार्चिकञ्च ।

पूर्वार्चिकं छन्दः छन्दसी छन्दसिका चापि कथ्यते । अस्य चत्वारो भेदाः सन्ति-आग्नेयः ऐन्द्रः पवमानः आरण्यक पर्व इति । एते विषयानुकूलविभागाः सन्ति । एषु पञ्चाशदधिकषट्शतमन्त्राः प्राप्यन्ते तथा चेमे मन्त्राः षट्सु प्रपाठकेषु विभक्ताः सन्ति । प्रथमे प्रपाठके अग्निविषयकमन्त्राणां संकलनमस्ति । द्वितीयादारभ्य चतुर्थप्रपाठकपर्यन्तमिन्द्रस्य स्तुतयः वर्त्तन्ते । पञ्चमे सोमाधायका मन्त्राः सन्ति ये च ऋग्वेदस्य नवममण्डलादुद्धृताः । प्रपाठकोऽयं सोमः पवमानो वाऽपि निगद्यते ।

उत्तरार्चिकं हि गीतवितानम् । अत्र चतुःशतगीतानि प्राप्यन्ते । वस्तुतः पूर्वार्चिके मन्त्रविनिवेशो देवं छन्दश्चाधिकृत्याभूत्, उत्तरार्चिके तु यज्ञानुष्ठानमवलम्ब्य गीतानां योजनं कृतमस्ति । प्रतिगीतं प्रायः त्रयो मन्त्राः सन्ति । क्वचिच्चैकस्मिन् गीते चत्वारो मन्त्रा अपि प्राप्यन्ते । एवं सति सर्वयोगं विधाय पञ्चविंशत्यधिकद्वादशशतमन्त्रा उपलभ्यन्ते । ते च नव प्रपाठकेषु नियोजिताः सन्ति ।

विषयानुसारमुत्तरार्चिकस्य सप्तभेदाः सन्ति—दशरात्रसंवत्सरैकाहाऽहीनसत्र- प्रायश्चित्तक्षुद्रा इति ।

सामवेदस्य निखिला मन्त्रा वैणिकाः सन्ति । वीणायां मधुरस्वरेणेमे गेया भवन्ति । एषां प्रयोगो हि विभिन्नदेवविभूतीनां समताललयेन सह गुणाख्यानमस्ति । सामवेदीयमन्त्रेषु त्रयो वेदस्वराः उदात्तानुदात्तस्वरितश्चेति प्रधानाः स्वराः सन्ति । एतद्गायने शिक्षाकारनारदमतानुसारं 'सा-रे-ग-मा-प-ध-नी-(सा)' इति संगीत- सप्तस्वराणामुपयोगो भवति । एवञ्च भारतीयसंगीतशास्त्रस्य मूलाधारः सामवेद एव वर्त्तते ।

सामगानस्य चत्वारि रूपाणि सन्ति-गेयमारण्यकमूहमूह्यञ्चेति । गेयारण्यके पूर्वार्चिकस्य भवतः । तथा चोहोह्ये उत्तरार्चिकस्य ।

गेयं प्रकृतिगानं भवति । क्वचित् तद् ग्रामगानरूपेणाभिधीयते यतः तद्गायनं ग्रामे भवति । कदाचित् तस्यापरं नाम वेयगानमपि प्राप्यते । पूर्वार्चिकस्य प्रथमतः

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चमाध्यापर्यन्तं ग्रामगेया मन्त्राः सन्ति । आरण्यकगानमारण्यकपर्वार्थं षष्ठाध्यायस्य मन्त्रगानार्थमस्ति। परवर्त्तिकाले कालस्थानवैशिष्ट्यादेतद्गीतानां संकलनमभूत् । इदं गानं गीतिप्रधानम् । अतो ग्रामे तद्गायनादनर्थस्य शंकाऽऽसीत् । अथवा 'तुमुलकोलाहलकलह' संकुले परिवेष्टने गायनेन तथाविधमन्त्राणां महिमा विनष्टो भवेदिति । तदर्थं पूतशान्ततपोवनमेव तन्मन्त्रार्थं सुन्दरोपयुक्तवातावरणं संभवति ।

ऊहोह्यगाने उत्तरार्चिकेन सम्बद्धौ स्तः । तदुद्देश्यं सामवेदस्य प्रतिष्ठा तत्क्रमेणासीत् यत्क्रमेण तन्निरूपितविधीनां विन्यासगुम्फनमभूत् । एतावता स्पष्टं यदिमे गाने परवर्त्तिकालिके भवतः । 'ऊह' इत्यस्यार्थो भवति ऊहनम्-अनुक्तवैलक्ष्यदर्शनमिति । तच्च मन्त्राणां सामयिकायोजनं भवति । ऊहोह्ये विकृते गाने भवतः । वेयोरण्यके तु प्रकृतियोनिरूपे स्तः । ऊहस्य प्रकृतिर्वेयगानम् । ऊह्यस्य प्रकृतिरारण्यकगानमिति । ऊह्यं रहस्यात्मकं भवति । एवञ्चारण्यकगानस्य विकृतत्वादरण्ये गेयमस्ति ।

इदं तु पुनरवधेयं यत् सामस्य मन्त्राः ताललयाश्रिताः सन्ति । ते च मौखिका वाद्याश्च भवन्ति । 'गै' धातोर्निस्पन्नशब्दः गानमिति परवर्त्तिकाले सामाभ्यार्थं प्रतिपादयति । सामगानि स्वरताललयादिसंगीततत्त्वाणां सन्देशं ददति ।

सामवेदस्य स्वरमण्डले सन्ति सप्तस्वराः त्रयो ग्रामा एकविंशति मूर्च्छनाः तथा च नवचत्वारिंशत् तानानि । इम एव सप्तस्वरा वीणास्वरसन्धानेन निम्नलिखिताः संजायन्तेः

साम	वेणुः	स्वरः
प्रथमं	मध्यमः	(म)
द्वितीयं	गान्धारः	(ग)
तृतीयं	ऋषभः	(रे)
चतुर्थं	षड्जः	(सा)
पञ्चमं	निषादः	(नि)
षष्ठं	धैवतः	(ध)
सप्तम्	पञ्चमः	(प)

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्त्वत उपर्युक्ततालिका संगीतनृत्यादिप्राचीनभारतीयललितविद्यानां मातृकेव तिष्ठति। सा चानेन वेदेनैव प्रकाशिता वर्त्तते। यजुर्वेदस्यापि वाक्यमस्ति **साम प्राणं प्रपद्ये।** एवञ्च सामवेदो हि भारतीयनामुपासनेशप्रणवस्य गायनवेदोऽस्ति। अनेनैवायं वेदः वेदेषु सर्वाधिकः प्रियो भवति।

यज्ञनिष्पादनसमये विशेषरूपेण सोमसवनस्य विधानमस्ति। तस्मिन् काले सामगानं भवति। लोकानुरञ्जनार्थं वेयगानस्य विधिरस्ति। महाभारतस्य शान्तिपर्वणा ज्ञातं भवति यद् भीष्मस्य शवदाहक्रियाकाले सामगायनमभूत्। परमभगवद् भक्तौ लीनाः सामगा ऋषिजना सामगानं गायन्ति स्म। एवं प्रकारणे सामवेदस्य समादरः सार्वकालिकः सार्वत्रिकः सार्वजनिकश्च भवति। तेनैव भगवता कृष्णेनोद्घोषितम्- **वेदानां सामवेदोऽहम्।**

सामवेदिनः सोमस्य महान्तं महिमानं प्रस्तुवन्ति। सोमलताया रागो हरितो भवति। सा च विजयापत्रवर्णा भवति। स जलस्योपरि तरणशीला, वृक्षमुपरि लम्बमाना भूमावुत्पन्ना भवति। नदीकूले जलसमीपे कान्तारे च सोमवल्ली नरीनृत्यति, सा च प्रचुरमात्रायां पर्वतेषु, विशेषतो मूजवत्पर्वते उत्पद्यते। सोमस्य 'पर्वतावृध' नाम्ना गिरिष्ठनाम्ना च सङ्केतो मिलति यदियं लता पर्वतीयायां समतलभूमौ प्रसरति। सोमलतायां पञ्चदशपत्राणि भवन्ति। चन्द्रवदियं वर्द्धते तथैव क्षयति। चन्द्रेण सह सोमस्योपमा भवति। यदा कदा चन्द्रोऽपि वैदिककविना 'सोम' इति संज्ञायते।

सोमसवः प्रस्तरैः कुट्टनेन विधीयते। यदा कदा सोमसवने मुसलोखलयोरोपि सहयोगोऽपेक्ष्यते। सोमाभिषवनस्य भूमिका महती वैधानिका भवति। सोमयागात् प्राक् षट्त्रिंशदङ्गुलिदैर्ध्यप्रमाणे तथा चाष्टादशाङ्गुलिवितते फलके समास्तीर्णकृष्णाजिनपट्टके सोमलताः स्थापिता भवन्ति; तदनन्तरं तासामभिमन्त्रणं क्रियते। ततो ग्रावणा संमर्द्य द्रोणकलशे निक्षिप्यन्ते। संमर्दनपुरस्सरं वल्लीनां जले संमिश्रणं क्रियते। तदनन्तरमूर्णवटेन परिमार्जनं भवति। तथा सति परिधावतः सोमरसस्य धारा नीचैः पेयपात्रे पतति, ऋषीणां हृदि सङ्गीतलहरीमुत्पादयति च। सोमरस दुग्ध-दधि-धृत-मधु-सक्तुप्रभृतिस्निग्धद्रव्याणां संमिश्रणस्य वचनमस्ति। तस्मात् सोमरसो महान् मधुरो भवति। तस्य गन्धोऽपि सुरभितः सन् मादको जायते। मधुसंमिश्रणेन सोमो मधुमान् भवति। अत एव सोमो मधुमन्मधुपीयूषादिसंज्ञाभिरपि व्याह्रियते।

Digitization by Arya Samaj Charitable Foundation, Chennai

सोमरसो हि वैदिकविदुषां प्रधानपेयो वर्त्तते । देवार्पणं कृत्वा वषट्कार उद्गाता यजमानो ब्रह्मा च सर्वे सोमरसं पीत्वाऽऽनन्दमग्ना भवन्ति । तेन हि जनो दृढोत्साहो भवति, तस्य बल-बुद्धि-विवर्धनं भवति । तेनैवानन्दस्य वर्षणं जायते । एतदर्थं वैदिककवेरियं कामनाऽस्ति-यदिन्द्रः सोमं प्राप्नुयात् यतो वृत्रासुरस्य हनने स समर्थो भवेत्, तथा च सङ्ग्रामे स शम्बरस्य नवनवति-नगरीणां विध्वंसं कुर्यात् । साममन्त्रो हि—

स पवस्व य आविथेन्द्रं वृत्राय वृत्राय हन्तवे
व्रबिंवांसं महीरपः ॥८॥
अया वीतो परिस्त्रव यस्त इन्दोमदेष्वा
अवाहन्नवती नंव ॥९॥

सामवेद ५-३-८, ९

यश्च सोमपानं कुर्यात् सोऽमरत्वं प्राप्नोति, तस्य शरीरे संस्फूर्तिर्जायते, तस्य मनसि दिव्योल्लास भवत्यजस्रम् । अत्रत्यौ मन्त्रौ—

पवमानो अजीजनद्दिवश्चित्रं न तन्युतम्
ज्योति वैंश्वानरं वृहत् ॥८॥
परि स्वानास इन्द वो वर्हणा गिरा,
मधो अर्षन्ति धारया ॥९॥

सामवेद ५-२-८, ९

सोमपानेन तमो विनश्यति, चेतनायाः स्वर्णिमप्रकाशः समक्षं समायाति । सोमपायी चोर्ध्वगतिं प्राप्नोति । मन्त्रो हि—

तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
तरत्स मन्दी धावति ।

सामवेद-५-४-४

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चमोऽध्यायः

यजुस्संहिता— यजुर्वेदः

यजुःशब्दस्यार्थो भवति यजनं पूजनं करणञ्च। यज् धातावुसिप्रत्यययोगात् 'यजुस्' इति निष्पन्नो भवति। एवञ्च यजुःशब्देन यज्ञकर्मविषयकाध्वर्यवार्थस्य प्रत्यायनं भवति। वैदिकयज्ञक्रियायां होता प्रथममृग्वेदस्य मन्त्रैर्देवं शंसति, तञ्चोद्गाता साममन्त्रगानेन स्तौति। तत्र यजुर्वेदस्याध्वर्युराहुतिप्रदानेन तं प्रोत्साहयति।

तथा च यजुर्वेदो ह्यध्वर्यवप्रयोगायपयोगिनां यजुर्मन्त्राणां संग्रहो विद्यते। स कर्मवेद इत्यपि व्यवह्रियते। वेदानां यज्ञार्था प्रवृत्तिरिति प्रसिद्धिः। यज्ञे चान्तत ऋत्विक्त्रयेन कर्माणि क्रियन्ते, एवञ्च प्रत्येकमृत्विजा क्रियामाणकर्मसम्पादनादि भेदेन हौत्रो वेद उद्गातृवेद अध्वर्युवेद इति संज्ञा पूर्वोक्तानां त्रयाणां वेदानां भवति। एवमेतरेये उक्तमस्ति-**"यद्वचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा-त्रयी विद्या भवति"**।

वस्तुस्तु 'यज्ञेन वाचं पदवीयमान'मिति वाक्याद् यजुर्वेदस्य वैशिष्ट्यं संगच्छते। वेदप्रतिपाद्ययज्ञस्य प्राणा ऋचः, नादः साम, परं प्राणनाद-शरीराणि यजूंषि। मन्त्राणां प्रयोगो यजुर्वेदेनैव सार्थकतामुपैति। अपरञ्च वैलक्षण्यं यजुषः। ऋक्सामन्त्राणां रूपं केवलं पद्यम्, अन्यतो यजुर्मन्त्राः पद्यात्मका गद्यात्मकाश्च। उक्तं हि गद्यात्मको यजुः। शेषे यजुः शब्दः। एवञ्च ऋक् सामान्यां भिन्नपद्यगद्यात्मकमन्त्राणां नाम यजुः। यजुष अन्यदपि विशेषणमस्ति। यजुषिं मन्त्राक्षराणां संख्या नियता नाऽस्ति। याज्ञिकप्रयोगानुसारं मन्त्राक्षर वृद्धिजायते अन्यथा ऋक् पादबद्धा, तत्राक्षरं मितमेवास्ति। एवञ्च सामापि स्वरबद्धमेव। तत्राप्यक्षराणि मितानि सन्ति। यजुरमिताक्षरं मिताक्षरञ्च भवति। तेन तस्य गद्यात्मकत्वं सङ्केतितं वर्त्तते। परं यजुषो गद्येऽपि तादृक् स्वरसामञ्जस्यं प्राप्यते, येन यजुर्गद्यबन्धे काव्यात्मकता सुरक्षिताऽस्ति।

सम्प्रदायभेदेन यजुस्संहिताया द्वौ भेदौ स्तः। आदित्यसम्प्रदायस्य प्रतिनिधित्वं शुक्लयजुर्वेदः करोति, ब्रह्मसम्प्रदायस्य कृष्णयजुर्वेदः।

Digitization by Arya Samaj Charitable Foundation, Chennai

शतपथब्राह्मणमतानुसारं शुक्लयजुर्वेदो वाजसनेययाज्ञवल्क्येनाख्यातोऽस्ति। तद् वाक्यमस्ति— **आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।** (शत. ब्राह्मणे-१४-९-५-३३) यजुर्वेदस्य कृष्णशुक्लयोः भेदो रूपगततथ्याधारितोऽपि संभवति। शुक्लयजुःसंहितायां केवलं मन्त्रा एव सन्ति, कृष्णयजुःसंहितायां तु मन्त्रैः सह याज्ञिकविधीनाश्रित्य वादविवादस्य प्रसङ्गान्यपि यत्र तत्र प्राप्यन्ते। इत्थं शुक्लसंहितायां ता एव प्रार्थना याज्ञिकनियमाश्च वर्त्तन्ते, यदुच्चारं दर्शपौर्णमासादियज्ञानुष्ठानावसरे अध्वर्युः करोति। कृष्णसंहितायां तु तानि तत्त्वानि समागतानि सन्ति यानि ब्राह्मणग्रन्थस्याथवा शुद्धदर्शनचिन्तनस्य प्रारूपं मन्यामहे। संभवतो मन्त्रब्राह्मणस्य संमिश्रणं कृष्णयजुर्वेदस्य कृष्णत्वस्य हेतुः स्यात्। एवञ्च मन्त्राणां विशुद्धरूपसंरक्षणं हि शुक्लयजुर्वेदस्य शुक्लत्वं भवेत्। कृष्णयजुर्वेदे तथाविधब्राह्मणसम्मितवर्णनानि विद्यन्ते यत्र क्वापि मन्त्राणां व्याख्यानं प्राप्यते क्वचिच्च मन्त्रप्रयोगः स्पष्टीक्रियते। अत एव तस्य कृष्णयजुर्वेद इति नाम सार्थकं भवति। एतद् विपरीतं शुक्लयजुर्वेदे ब्राह्मणभागः स्वतन्त्ररूपेण संलग्नोऽस्ति यश्च शतपथ-ब्राह्मणनाम्ना प्रथितो वर्त्तते। कृष्णयजुर्वेदे गद्यपद्यावुभौ स्तः। तत्स्वरूपं परवर्त्तिसाहित्यस्य चम्पूसदृशमस्ति।

एतदप्यवधेयम् यत् कृष्णयजुर्वेदः शुक्लयजुर्वेदापेक्षया नवीनः प्रतीयते। तथा चेदं संभवति यद् यजुर्वेदानुशीलनपरा अध्यात्मवादिनो मन्त्रान् यथाक्रमं विन्यस्य तथान्वभवन् यन्मन्त्राणां संकलनेन सह सम्यक् प्रयोगाय तद्व्याख्यानमप्यावश्यकमासीत्। कृष्णशुक्लनामकरणाद् बहुधा विदुषोऽपि कृष्णयजुर्वेदस्य प्राचीनताया अलीकधारणा जायते। तथापीदं स्वीकरणीयं स्याद् यच्छुक्लयजुर्वेदस्य ईशावास्योपनिषद्रूपः परिशिष्टाध्यायोऽवश्यमेव परवर्त्तिकालिकोऽस्ति।

तत्रेदमवधेयं यत् पृथक् पृथग्याज्ञिककर्मणामवतरणेन यजुर्वेदस्य विभिन्नाः शाखा अभूवन्। महावैयाकरणपतञ्जलेरुल्लेखाद् यजुर्वेदस्यैकाधिकशतशाखानां निर्देशो भवति। सूतसंहिताब्रह्माण्डपुराणस्कन्दपुराणादिग्रन्थानुसारेण सप्ताधिकैकशतशाखा आसन्। एवञ्च मुक्तिकोपनिषदाधारेण नवाधिकैकशतशाखाः शौनकस्य चरणव्यूहानुसारेण तु षडशीतिशाखा यजुर्वेदस्य सङ्केतिताः सन्ति। परं दौर्भाग्यादद्य यजुर्वेदसंहितायाः षट्शाखा एवोपलब्धा वर्त्तन्ते। एषु तैत्तिरीय-मैत्रायणी-कठ-कपिष्ठलसंज्ञकाश्चतस्रः शाखाः कृष्णयजुर्वेदस्य तथा च वाजसनेयसंहिता काण्वसंहिता च शाखाद्वयं शुक्लयजुषः। आपस्तम्ब-प्रसिद्ध्या तैत्तिरीय-

Digitization by Arya Samaj Charitable Foundation, Chennai

शाखा आपस्तम्ब शाखेति निगद्यते । आसु षट्शाखासु वाजसनेयी (माध्यन्दिनी वा) संहिताया विशेषप्रचारः उत्तरे भारतवर्षे प्राप्यते तैत्तिरीयस्य तु दक्षिणे भारते ।

तत्र प्राथम्येन तैत्तिरीयसंहितायाः सर्वाधिकमहत्त्वं साहित्यिकं वर्त्तते । एतत्संहिताया ब्राह्मणारण्यकोपनिषत्सूत्राणां परम्परा महता साफल्येन सुरक्षिताऽस्ति । अस्यां सप्तकाण्डानि चतुश्चत्वारिंशत् प्रपाठका एकपञ्चाशदधिकषट्शतानुवाकाः एवञ्चाष्टनवत्यधिकैकविंशतिशतकण्डिका सन्ति । इह पौरोडाश-याजमान-वाजपेय-राजसूयप्रभृतियाज्ञिकानुष्ठानानां साङ्गोपाङ्गविवरणमायाति । अनेन स्पष्टमेतद् यत् तैत्तिरीयसंहितायाः स्वरूपं महत् स्थूलमस्ति । अत्रैव सायणाचार्यबालकृष्णदीक्षितप्रभृत्याचार्याणां प्रामाणिकं भाष्यं प्राप्तमस्ति ।

१९१४-१५ ख्रिष्टाब्दे **हारवर्ड ओरिन्टलसिरिजस्य** प्रकाशनमालायां सप्तदशाष्टादशसंख्यकप्रसूनकाविवास्य ग्रन्थस्य प्रामाणिकत्वेनाङ्गलभाषारूपान्तरणं समूलपाठं संस्कृतसुधीसमाजे समागतं विद्वद्वरेण्य डॉ. कीथ महोदयस्य कृतिरूपेण । तदनन्तरं १८८१-८५ ख्रिष्टाब्देषु लिपजीग नगरतो विश्वविश्रुतविद्वान् डॉ. **श्रोदरो** मैत्रायणीसंहितायाः प्रथमं प्रकाशनं जर्मनभाषानुवादेन सह कृतवान् । अस्यां दर्शपूर्णमासचातुर्मास्यवाजपेयाश्वमेधराजसूयसौत्रामण्यादियज्ञानां विवरणमायाति । अत्र चत्वारि काण्डानि चतुः पञ्चाशत् प्रपाठका श्चतुश्चत्वारिंशदधिकैकत्रिंशत् शतसंख्यका मन्त्राः प्राप्यन्ते । मन्त्रेषु १७०१ संख्यका ऋग्वेदस्य सन्ति । गुर्जरे दक्षिणभारते च ब्राह्मणसमाजे अस्याः संहितायाः अकुण्ठितादरो अद्यापि भवति ।

काठक (कठ) संहितायां पुरोडाशादियज्ञानुष्ठानानां वर्णनमस्ति । अस्यां पञ्च खण्डानि सन्ति यानि चोठिमिकामध्यमिकोरमिकायाज्यानुवाक्याश्वमेधाद्यनुवचननामभिरभिहितानि सन्ति । एषां खण्डानामुपविभागः स्थानकेषु भवति । अन्यशाखानां प्रपाठकस्य स्थानेऽत्र स्थानक इति संज्ञा या वैदिकसाहित्येऽन्यत्र क्वापि न प्राप्यते । अयमेव विभेदोऽस्ति यत् स्थानकः प्रपाठकापेक्षयाल्पाकारको भवति । सर्वयोगं कृत्वा कठशाखायां चत्वारिंशत् स्थानकाः त्रयोदशानुवचनानि त्रिचत्वारिंशदधिकाष्टशतानुवाका एकनवत्यधिकत्रिसहस्रमन्त्राश्च सन्ति । महाभाष्यकारमतानुसारं प्रतिग्रामं काठकस्य प्रचार आसीत्— ग्रामे ग्रामे काठकं कापालकं च प्रोच्यते इति पतञ्जलिप्रोक्तिः । पुराणमते काठकस्य बृहत्प्रचारो मध्यदेशेऽभूत् । इदानीं काठका अल्पसंख्यका एव, ते च कश्मीरे निवसन्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

काठकसंहितायाः सर्वप्रथमप्रकाशनस्य श्रेयः **श्रोदरमहोदयस्य** वर्त्तते, तत्प्रकाशनं १९१० खिस्ताब्देऽभूत्। कठ-प्राच्यकठ-कपिष्ठलकठानामुल्लेखः चरणव्यूहस्यानुक्रमणिकायां चरकशाखान्तर्गतोऽभूत्। कपिष्ठलो नाम कश्चिदृषिर्यस्य निर्देशः पाणिनेरष्टाध्याय्यां 'कपिष्ठलो गोत्रे' इति सूत्राद् भवति। निरुक्तटीकाकारो दुर्गाचार्योऽपि स्वं कपिष्ठलवासिष्ठ इत्यघोषयत्— अहं च कापिष्ठलो वासिष्ठः। अस्याः शाखाया एकैव हस्तलेखप्रतिः, सापि खण्डिताऽपूर्णा च, काशी-राजकीय-संस्कृतमहाविद्यालयस्य सरस्वतीभवनपुस्तकागारे सुरक्षिता वर्त्तते। तामेवानुसृत्य **डॉ. रघुवीरो** लाहौरतः १९३२ खिस्ताब्दे प्रामाणिकसंस्करणं सम्पादितवान्। अत्र षडष्टकाः सन्ति, अष्टकोऽध्यायेषु विभक्तो वर्त्तते। अष्टाध्यायरूपप्रथमाष्टकः सम्पूर्णरूपेण सुरक्षितोऽस्ति। द्वितीयतृतीयाष्टकौ त्रुटिपूर्णौ, अवशिष्टा-श्चतुर्थपञ्चमषष्ठाष्टका अंशतः खण्डिता सन्ति यत्र केवलं शेषाध्याया एव प्राप्ताः भवन्ति।

कृष्णयजुर्वेदस्योपर्युक्तशाखासु महत् साम्यं वर्त्तते। अत्र सहजमिदमुपपादनीयमस्ति यत् तैत्तिरीयमनुसृत्यैवान्यासां विभिन्नसंहितानां गुम्फनमभूत्। तैत्तिरीयशाखाया विषयविवेचनक्रम एवैतत् संहिताभ्य आदर्शरूपेण गृहीत इति बोधितं भवति।

शुक्लयजुर्वेदस्य संहिताद्वये वाजसनेयी संहितायाः सर्वाधिकप्रचारोऽस्ति। श्रूयते यद् वाजिरूपं धृत्वा सूर्यदेवो याज्ञवल्क्यायेदं वेदज्ञानं वररूपेण समर्थयामास। तेनास्य नामकरणं वाजसनेय इत्यभूत्। मध्यदिने वरप्रदानेनास्यापरं नाम 'माध्यन्दिन' इति। सूर्य्यात् प्राप्त्या प्रभास्वरूपप्रमाणादिकं प्रयोजनं हि शुक्लविशेषणस्येति।

शुक्लयजुर्वेदसंहितायां चत्वारिंशदध्यायाः सन्ति। तत्र त्र्यधिकत्रिंशदानुवाकाः पञ्चसप्तत्यधिकोनविंशतिशतसंख्यकाः कण्डिका मन्त्रा वा प्राप्यन्ते। सर्वयोगं विधाय वाजसनेयीसहितायां २९,६२५ शब्दाः ८८, ८७५ अक्षराणि चोपलभ्यन्ते।

शुक्लयजुर्वेदस्य प्रथमाध्याये दर्शपौर्णमासयोः, द्वितीये पूर्वोक्तपौर्णमासावशिष्टांशस्य तथा च पिण्डपितृयज्ञस्य, तृतीयाध्याये चाग्निहोत्रचातुर्मास्ययज्ञानामुपयोगिमन्त्राणां संग्रहो वर्त्तते। तदनन्तरं चतुर्ष्वध्यायेषु सोमयागस्य प्रकरणमस्ति। नवमे दशमे च क्रमशो वाजपेयराजसूययज्ञानुष्ठानं वर्णितमस्ति। राजसूयो राजाभिषेकानुष्ठानविषयको भवेदिति तत्र शस्त्रास्त्राभ्यासद्यूतक्रिडादिराजोचितक्रियाणां

Digitization by Arya Samaj Charitable Foundation, Chennai

वर्णनमस्ति। परवर्त्त्यष्टादशाध्यायेष्वग्निचयनस्य प्रसङ्गो वर्त्तते। तत्राग्निवेदि-निर्माणस्य वैधानिकं वर्णनमस्ति। वेदिरियम् अष्टशताधिकदशसहस्राष्टकाभिर्निमिता भवति, यस्याकृतिः पक्षप्रसारितखगवदेव भवति। अग्निचयनं संस्कार-सम्पन्नजनजीवनस्य प्रधानं कर्मेति। जीवनस्य सर्वे विधयोऽग्निनैव सम्पाद्यते। जीवनं हि प्राणाग्निना प्रारभ्यते, तत् समाप्यते चाग्निना। अग्न्याधान एव गेहिनां योगिनाञ्च सर्वाः साधनाः सम्पादिता भवन्ति। एकोनविंशत्यध्यायत एकविंशतितमाध्यायपर्य्यन्तं सौत्रामणीयज्ञस्य विधिवर्णनमस्ति। यज्ञेऽस्मिन् सोमरसस्य स्थाने सुरापानस्य प्रचलनं भवति। ऋग्वेदे सुरा 'दुर्मद' शब्देन सूच्यते। सा हि क्रोधादिपापकृत्यानां प्रेरिकेति सैव यज्ञविधाने प्रस्तूयते। तामेव सुरामश्विनीकुमारः प्रीत्यर्थमिन्द्राय सरस्वत्यै चाहुत्या प्रयच्छति, सोत्रामण्यां सुरां पिबेदिति वाक्यमायाति, तदर्थमेव सौत्रमाणीमहोत्सवो विहितोऽस्ति। द्वाविंशतितमाध्यायतः पञ्चविंशतितमाध्याय- पर्य्यन्तमश्वमेधयज्ञस्य प्रकरणमस्ति यदनुष्ठानं सार्वभौमाधिपत्याधिकारिणे सम्राजे कल्पितमस्ति।

शुक्लयजुर्वेदस्यान्तिमाः पञ्चदशाध्यायाः पूर्वोक्तपञ्चविंशत्यध्यायेभ्यो रूपतः तत्त्वतश्च भिन्ना एव प्रतीयन्ते। उत्तरार्धमिदं परवर्त्तिकालिकं सङ्कलनमिति सहजं समास्थातुं शक्यते। षड्विंशतितमाध्यायतो नवविंशतितमाध्यायपर्य्यन्तं भारतीय परम्परापालने खिलमन्त्राः सङ्कलिताः सन्ति। त्रिंशत्तमाध्याये 'पुरुषमेध'स्य वर्णनमायाति यत्र चतुरशीतिपदार्थानामालम्भनमेधस्य निर्देशोऽस्ति। प्रकरणस्यास्य प्रयोजनं नरमेधस्य लाक्षणिकविधानमस्ति। आलम्भनानीमानि हि वास्तविकालम्भनं न भूत्वा प्रतीकरूपत्वादुल्लिखितानि सन्ति। आसु यज्ञव्यक्तिषु पुरोहितवर्गाय ब्राह्मणस्य राजकुलाय पराक्रमशीलयोद्धुर्यतये,शूद्रस्य तमसे, तस्कराय वासनायै, वेश्यायाः कोलाहलाय, गायकस्य, नृत्याय, वन्दिनो, गीताय, अभिनेतुर्निद्रायै, नेत्रहीनस्य, समुत्सवाय, वीणावादकस्य विलपनाय, मुरलीधरस्य पृथिव्यै, पंगोस्तथा च स्वर्गाय मुण्डितमस्तकधारिखल्वाटस्य प्रतीकालम्भोऽभिहितोऽस्ति। स्पष्टमिदं प्रतीयते यदेषां यज्ञानां महत्त्वं यजनविधिगहनतायां सैद्धान्तिकगूढतायाञ्च सुरक्षितमस्ति। वास्तविकतायाः क्रियात्मकरूपविवेचनमत्र नासीत्। यज्ञोऽयं केवलं साङ्केतिकोऽभूत्। नास्त्यत्र लवोऽपि सन्देहो यदेषु मेधेषु नासीत् पुरुषस्य हत्या। यज्ञविधानं काल्पनिकमेवासीत्। भावस्तु वस्तु-प्रतीकत्वेन गृहीतस्तत्र, यतो हि पुरुषस्य प्रतिनिधिभूतभाववस्तुभ्यो भिन्नभिन्नपदार्थेषु दानविधानमासीत्। एकत्रिंशत्तमोऽध्याय ऋग्वेदस्य पुरुषसूक्तमस्ति यत्र पुरुषसूक्तापेक्षया षड्मन्त्रा अधिको-

Digitization by Arya Samaj Charitable Foundation, Chennai

पलब्धाः सन्ति। द्वात्रिंशत्तमाध्याये त्रयस्त्रिंशत्तमाध्याये च सर्वमेधस्य प्रकरणमस्ति। अयं हि सर्वोन्नतयज्ञः, यत्र यज्ञसमाप्तौ यजमानः सर्वस्वं दक्षिणायां समर्पयति, जीवनस्य सान्ध्यवेलामेकान्ते निर्जने वने तपस्विवद् यापयन् शान्तिमाप्नोति।

त्रयश्त्रिंशत्तमाध्यायस्य स्वरूपं तत्त्वञ्चोपनिषद एव स्तः। आदौ हिरण्यगर्भसूक्तस्य कियन्तो मन्त्रा उद्धृताः सन्ति। अत्र प्रजापतेर्ब्रह्मपुरुषरूपयोरभेदः स्थापितो वर्त्तते। चतुस्त्रिंशत्तमाध्यायस्य प्रथमषड्मन्त्राः शिवसंकल्पविषयाः सन्ति। इमे त्रयश्शिवसंकल्पोपनिषन्नाम्ना प्रसिद्धाः सन्ति। अत्र मनसस्तद्वृत्तीनाञ्च स्वरूपविवेचनमस्ति। तथा हि मनश्शिवसंकल्पभावनया प्रार्थ्यते यन्मनः शिवसंकल्पमस्तु। मनश्शान्त्यैव सर्वं सिध्यति। पञ्चत्रिंशत्तमाध्याये पितृमेधसम्बन्धिमन्त्राणां संकलनमस्ति। षट्त्रिंशत्तमाध्यायतोऽष्टत्रिंशत्तमाध्यायपर्य्यन्तं प्रवर्ग्ययागस्य प्रसङ्गोऽस्ति, यज्ञेऽस्मिन्नैका स्थाली प्रज्वलिताग्नौ स्थाप्यते, संतप्तेयं रक्तवर्णा जायते। तल्लाक्षणिकरूपे सूर्य्यप्रतीकावधारणं भवति। तत्र दुग्धं संतप्याश्विनीकुमाराभ्यां समर्पणं क्रियते। यज्ञान्ते सकलानि पात्राणि तथा स्थाप्यन्ते, येन तत्र मनुष्याकृतिर्भवेत्। अस्य यज्ञपुरुषस्य मस्तकं दुग्धपात्रमस्ति, तस्य केशपाशः पवित्रकुशानां शिखा, नेत्रे द्वे स्वर्णिमे किशलये, रुधिरञ्च दुग्धमिश्रितं मधु। एषु विधिषु नियमेषु च गूढरहस्यं निहितं परिलक्षितं भवति।

यजुर्वेदस्यान्तिमोऽध्यायो लोकप्रसिद्ध ईशावास्योपनिषदेवास्ति। उपनिषदियं प्राचीनतमा वर्त्तते, कारणमेषा वेदसंहिताया एवांशः। अस्य विश्वस्य समष्टेर्यन्मूलतत्त्वमस्ति तदेव व्यष्टितो व्यक्तेर्मूलतत्त्वं निष्पद्यते। चिन्तने महतीयमुपलब्धिः। ईश्वरः परमेश्वरो वा सर्वत्र तिष्ठति, सर्वमीश्वरमयम्, सर्वं तदैश्वर्येण व्याप्तमस्ति। ईशं विना किञ्चिदन्यन्नैव निरूपयितुं शक्यते। व्यष्टिगतभावना पूर्णसमष्टिमूलकभावनया सम्मिलिताऽस्ति प्राचीनोपनिषदः परमसत्यदर्शनेन को न चमत्कृतो भवेत्?

यजुर्वेदे याज्ञिकविधिनां प्राधान्यमस्ति। पुरोहितो वृक्षस्य शाखां छित्वा वत्सकाम् मुक्तान् करोति, तान्निः सारयति, कथयति च— इदं भवतु युष्माकं रसवर्धनाय। इदं वः शक्तिवृद्धिं करोतु। यदा काष्ठदण्डैरग्निः प्रज्वलितो भवति, तदा याज्ञिकः कथयति— अग्ने इदं तवेन्धनम्। इदं तवाशनं भवतु। अनेन तव वर्धनं पोषणं भवेत्। तथैवास्माकमपि वृद्धिर्भवतु समृद्धिः समायातु। तथैव पवनदेवं प्रार्थयति— हे पवनदेव, त्वं दिवारामं वह। दिवा वा रात्रौवा यद्दुरितमस्माभिः

Digitization by Arya Samaj Charitable Foundation, Chennai

कृतम् तद्दूरमपसारय । राज्याभिषेकावसरे राजा पृथिवीं सम्बोधयति— मातः पृथ्वि, त्वं मम सर्वस्वम् । त्वं माम् न क्लिश्नासि, अहमपि तुभ्यं कदापि कष्टं न दास्यामि । आचार्यो बालकमनुशास्ति—त्वं तेजो वर्चश्च प्राप्नुहि सततं कर्मशीलो भव । अधर्माचरणं त्यज । विद्योपार्जनं कुरु । उन्नतं पन्थानमवलम्ब्य शतवर्षमायुः प्राप्नुहि । नोद्विग्नो भव । अनवद्यानि कर्माण्येव कुरु ।

यज्ञविधानेषु यज्ञपात्रैर्यज्ञकर्मभिश्च सह देवसम्बन्धः स्थापितो भवति । पुरोहितो यजमानं यजमानपत्नीञ्च रज्ज्वा वध्वा कथयति— अदितये युवामेका माला । तथैवैकत्वं गच्छतम् । एकीभूय जीवनयापनं विधेयमिति । पुनश्च सोमयागकाले पुरोहितः आत्मसंवादं कुर्वन् शणवेतनतृणमालया स्वं बध्नाति कथयति च त्वमङ्गिरसां शक्तिरसि । ऊर्णैव सुकोमलासि । सुखं देहि । शान्तिं देहि । यदा कोऽपि पुरोहितो यज्ञपात्रं हस्ते गृह्णाति, तदा स कथयति— सवितुर्देवस्य प्रेरणयाहं त्वां विष्णोर्हस्तेन पूषणो हस्तेन च गृह्णामि । यागयज्ञेषु, जपहवनेषु देवः गृहे देवः हस्ते देवः, नेत्रयोस्समक्षे देवः, सर्वेषु संस्कारेषु देवः— सर्वं देवमयं जगत् । इत्थं वयमेकस्मिन् विचित्रलोके देवलोके च प्राप्नुमः । सर्वत्र देवस्य विभूतिर्विद्यमानास्ति निखिलं जीवनं दिव्यमस्ति ।

निस्सन्दिग्धमिदं यजुर्वेदकाले समागते ऋग्वेदस्य सहजा भावना गौणा जाता । ऋग्वेदस्य भावना-स्थानं यजुर्वेदकाले कर्मणा गृहीतम् । परमिदमपि सत्यं यद्यजुर्वेदो हि ऋग्वेदस्यभावमनुसृत्यैव तं यज्ञरूपमदात् । ऋग्वेदस्य वाक्यमस्ति— यज्ञेन वाचं पदवीयमानम् । वेद-वाणी यज्ञरुषेणैव प्रतिफलिता भवति स्म ।

यजुर्वेदकालस्य कर्मप्रधानपरिप्रक्ष्ये एव गम्भीरचिन्तनं प्रादुर्भवति यस्य प्रतिफलनमुपनिषत्साहित्ये स्फुटं भवति । यज्ञविधेर्निरर्थकबुद्ध्या गम्भीरचिन्तने प्रवृत्तिर्जातितिसम्मतिः सर्वथा भ्रममूलका । तथाविधं प्रचलितं मतं सर्वथा वर्जनीयम् यतो हि तथाविधव्याख्याने वास्ताविकताया अभावः परिलक्ष्यते । अर्थस्यानर्थावधारणं भवति । विवेकस्तु भारतीयदर्शने ज्ञानकर्मसमन्वयोऽनादि कालादारभ्य भारतीयजीवनसंस्कृतेराधारशिलाऽस्ति । तस्यैव निदर्शनं यजुर्वेदो भवति । एकतः सोममेध-पुरुषमेधाश्वमेधदर्शपौर्णमासादिकर्मयागानां प्रकरणं प्राप्यते अन्यत ईशावास्यशिवसंकल्प प्रभृत्युपनिषद्ज्ञानस्य सरिदपि प्रवाहिता दृष्टिगोचरा भवति । ज्ञानोपार्जनाय कर्ममयजीवनस्य महत्यावश्यकता वरीवर्त्ति । यजुर्वेदस्य मन्त्र- एव

Digitization by Arya Samaj Charitable Foundation, Chennai

वास्तवमिति च उपदिशति—"यदग्ने रोहितं रूपं तेजसः तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्य, अपागात् अग्नेरग्नित्वं, वाचारम्भणं विकारो नामधेयं, त्रीणि रूपाणीत्येव सत्यम् ।"[1] इत्यादिना ।

एवं छान्दोग्ये सतः मूलकारणत्वं, तस्य च संकल्पात् तेजोबन्नरूपायाः प्रकृतेः सृष्टिः, तस्यां च प्रकृतौ सतः अनुप्रवेशः, अनुप्रविष्टेन च तेन नामरूपव्याकरणं, जगतश्च कार्यस्य स्वकारणभूत-तेजोबन्नरूपत्वेनैव सत्यत्वम् इत्यादयः विचाराः प्रवर्तिताः । कार्यं सर्वं जगत् त्रिवृत्करणप्रक्रियानुरोधेन तेजोबन्नात्मकं नामधेयमात्रम् इति, मूलकारणं तु अद्वितीयं सत् एकमेवेति स्पष्टमुक्तं भवति ।

३.६. प्रजापतेः मूलकारणत्वपक्षः ।

प्रश्नोपनिषदि श्रूयते—"भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति । तस्मै स होवाच । प्रजाकामो वै प्रजापतिः । स तपोऽतप्यत । स तपस्तप्त्वा । स मिथुनमुत्पादयते रयिं च प्राणं चेतौ मे बहुधा प्रजाः करिष्य इति । आदित्यो ह वै प्राणः, रयिरेव चन्द्रमाः ...संवत्सरो वै प्रजापतिः । तस्य अयने दक्षिणं चोत्तरं च ।...मासो वै प्रजापतिः । तस्य कृष्णपक्ष एव रयिः, शुक्लः प्राणः ।...अहोरात्रो वै प्रजापतिः, तस्य अहरेव प्राणः रात्रिरेव रयिः ।"[2] इत्यादि ।

अत्र तपःकरणहेतुना मूलकारणत्वेन प्रजापतेः सगुणस्य कस्यचन ब्रह्मणः अङ्गीकारः आपाततः अनुभूयते । किन्तु तस्य संवत्सराद्यात्मकतायाः बोधितत्वात् वस्तुतः एषोऽपि पक्षः न व्यक्तिविशेषस्य मूलकारणत्वमङ्गीकरोति, किन्तु अमूर्तस्य कस्यचन पदार्थस्यैव । किञ्च, अत्र रयिरिति, प्राण इति च मिथुनस्योत्पत्तेः उपवर्णनं जगति परिदृश्यमानां द्वन्द्वात्मकतां सम्यक् व्याख्याति । किन्तु अत्रापि "प्रजापति" नामकं सर्वमूलकारणं तु अद्वितीयम् एकमेव तत्त्वमिति अवधेयम् ।

जगतः द्वन्द्वात्मकतायाः उपवर्णनं तैत्तिरीयकेऽपि श्रूयते । "सोऽकामयत, बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च ।

---

१. तत्रैव, ६.४.१-४

२. प्र० उ० १.३.१३

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य, सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनञ्च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च ।"[१] इति ।

जगतोऽस्य द्वन्द्वात्मकतां बृहदारण्यकमपि स्थिरीकरोति । "आत्मैवेदमग्र आसीत् पुरुषविधः ।...स इममेवात्मानं द्वेधापातयत् । ततः पतिश्च पत्नी चाभवताम्... । सा हेयमीक्षाञ्चक्रे; कथं नु मात्मन एव जनयित्वा सम्भवति, हन्त ! तिरोऽसानीति । सा गौरभवत् वृषभ इतरः, तां समेवाभवत् । बडबा इतराभवत् अश्ववृष इतरः । गर्दभी इतरा, गर्दभ इतरः तां समेवाभवत् । अजायन्त एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यः । तत्सर्वमसृजत ।"[२] इति ।

एवं जगति परिदृश्यमानं द्वन्द्वं विविधतया व्याख्याय जगतः मूलकारणं तु एकमेव प्रजापतिर्वा आत्मा वा इति एताः उपनिषदः स्थिरीकुर्वन्ति ।

३.७. आत्मनो मूलकारणत्वपक्षः ।

बृहदारण्यके श्रूयते, "आत्मैवेदमग्र आसीत् पुरुषविधः । सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्;...स द्वितीयमैच्छत् । स हैतावानास । यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधापातयत् । ततः पतिश्च पत्नी चाभवताम् ।"[३] इति ।

तैत्तिरीयकेऽपि श्रूयते—"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् ।"[४] इत्यादि ।

ऐतरेयेऽपि श्रूयते, "आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति । स इमांल्लोकानसृजत अम्भो, मरीचीः, मरम्, आपः... । स ईक्षत इमे नु लोका लोकपालान्नु सृजा इति । सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् । तमभ्यतपत् । तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डं, मुखाद्वाचः,

---

१. तै० उ० २.६
२. बृ० उ० १.४.१-४
३. बृ० उ० १.४.१-४
४. तै० उ० २.१

Digitization by Arya Samaj Charitable Foundation, Chennai

वाचोऽग्निः... । स ईक्षत इमे नु लोकाश्च लोकपालाश्च; अन्नमेभ्यः सृजा इति ।...स ईक्षत कथं नु इदं महते स्यादिति । स ईक्षत कतरेण प्रपद्या इति... । स एतमेव सीमानं विदार्य एतया द्वारा प्रापद्यत ।"[१] इत्यादि ।

अत्र आत्मनः सृष्टेः प्राक् विद्यमानत्वं, तस्यैव च संकल्पकरणद्वारा जगत्स्रष्टृत्वं च स्पष्टं प्रतिपादितमस्ति । सृष्टिक्रमस्तु तिसृष्वपि उपनिषत्सु विविधतया उपवर्णितोऽस्ति । ऐतरेयके अयं विशेषः यत्, लोकसृष्टेः अनन्तरं लोकपालानाम् इतरेषां च सृष्टेः प्राक् कस्यचन पुरुषस्य सृष्टिः उपवर्णिता । तन्माध्यमेन च इतरा सृष्टिः इति । तैत्तिरीयके तु अयं विशेषः यत्-अत्र आकाशादीनां स्रष्टृत्वम् आत्मनो नोक्तम् । किन्तु आत्मनः सकाशात् आकाशादीनाम् उत्पत्तिः एव कथिता । एतेनेदं ज्ञायते यत् आकाशादयः पदर्थाः आत्मनि सूक्ष्मरूपेण विद्यमानास्सन्तः कालान्तरे ततः स्वयं सम्भवन्ति इति । किञ्च अस्यां श्रुतौ पञ्चानामपि भूतानाम् उत्पत्तिः श्रुता; तत्रापि येन क्रमेण तेषां सम्भवः कथितः, सः क्रमोऽपि नितान्तं समीचीनः इति ।

३.८. ब्रह्मणो मूलकारणत्वपक्षः ।

तैत्तिरीयके श्रूयते, "यतो वा इमानि भूतानि जायन्ते; येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति; तत् विजिज्ञासस्व; तत् ब्रह्मेति ।"[२] इति । अत्र जगतः उत्पत्ति-स्थिति-लयानां कारणं ब्रह्म इति उक्तं भवति । त्रयाणामपि उत्पत्तिस्थिति-लयानां ब्रह्मणि अङ्गीकारात् ब्रह्म जगतः उपादानकारणम् इत्यायाति । अत एव च "सर्वं खल्विदं ब्रह्म"[३] इत्यादिवचनान्यपि सङ्गच्छन्ते । उपादानकारणात् कार्यस्य अनन्यत्वाङ्गीकारात् ।

एवं जगतः मूलकारणस्य विषये कतिचन प्रधानानि मतानि विवेचितानि । अन्यान्यपि कानिचन मतानि सन्ति, किन्तु, अवकाशाभावात् तानि सर्वाण्यत्र न विवेचितानि ।

---

१. ऐ० उ० १.१-३

२. तै० उ० ३.१

३. छां० उ० ३.१४.१

Digitization by Arya Samaj Charitable Foundation, Chennai

३.९. अत्रेदमवधेयम्

३.९.१ सर्वास्वपि पूर्वं विवेचितासु उपनिषत्सु जगन्मूलकारणविषये अद्वैत-दृष्टिरेव प्रबला परिदृश्यते। भूतानि यद्यपि पञ्च, यद्यपि च भौतिकं जगत् पांक्तं तथापि कस्यचन अन्यतमस्य भूतस्य मूलकारणत्वम् अङ्गीकर्तुं प्रयासः विहितः केषुचित् पक्षेषु। सतः मूलकारणत्वपक्षे, आत्मनः मूलकारणत्वपक्षे च कण्ठतः एव सतश्च आत्मनश्च अद्वितीयत्वं प्रतिपादितम्। यत्रापि तेजोऽबन्नानां, रयिप्राणयोर्वा मूलकारणत्वं प्रतिपादितं; तत्रापि तेषां च तयोश्च मूलकारणं क्रमात् सदिति प्रजापतिरिति चोक्तम्। एवञ्च जगतो मूलकारणविचारे सर्वत्र तादृशं मूलकारणम् एकम् अद्वितीयमेव भवितुमर्हतीति धारणा उपनिषदृषीणां दृढा आसीदिति तर्कयितुं शक्यते।

३.९.२ किञ्च उपनिषत्सु मूर्तस्य आकारादिमतः कस्यचन पुरुषस्य देवस्य वा जगन्मूलकारणत्वाङ्गीकारः मृग्यः एव। प्रजापतिः मूलकारणम् इति पक्षेऽपि तदनन्तरमेव, "संवत्सरो वै प्रजापतिः" इत्यादिना तस्य कालादिरूपत्वाङ्गीकारात् अमूर्तत्वम् एव प्रतिष्ठापितम्। यास्वपि श्वेताश्वतराद्युपनिषत्सु रुद्रादीनां जगन्मूलकारणत्वमङ्गीकृतं दृश्यते, तत्रापि एक एव तादृशः अद्वितीयः ताभिरङ्गीकृतः इत्यवधेयम्।

३.९.३ शरीराद्बहिः परिदृश्यमानस्य जगतः शरीरादन्तः अनुभूयमानस्य च जगतः स्वरूपतः साम्यं यदाविष्कृतम् उपनिषदृषिभिः, एतदेव औपनिषदस्य दर्शनस्य अत्यन्तमहत्त्वपूर्णं योगदानमिति वयं मन्यामहे। तथाहि। ऐतरेये श्रूयते, "...तस्याभितप्तस्य मुखं निरभिद्यत, यथाण्डम्; मुखात् वाचः; वाचोऽग्निः"[१] इत्यादि। अत्र आन्तरस्य वाचः बाह्येन अग्निना साम्यं प्रतिपादितम्। एवमेवान्यत्र बोध्यम्। एवं, "य एषोन्तरक्षिणि पुरुषो दृश्यते...यश्चासावादित्ये;स एक एव" इत्यादिस्थलेषु सूर्यस्य चक्षुषः च दिशां श्रोतस्य च एवमन्येषां च साम्यं समानरूपता च कथिता।

---

१. ऐ० उ० १.१-३

Digitization by Arya Samaj Charitable Foundation, Chennai

३.९.४. बाह्यप्रपञ्चस्य पृथिव्यादिरूपस्य मूलकारणान्वेषणप्रसङ्गे उपनिषदृषय: आन्तरप्रपञ्चपरीक्षाम् उपायत्वेन आश्रितवन्त: इत्यपि वक्तुं शक्नुम: । तथाहि । "आत्मैवेदमग्र आसीत् पुरुषविध: । सोऽहमस्मीति अग्रे व्याहरत् । ततोऽहं नामाभवत्; तस्मादप्येतर्हि आमन्त्रितो अहमयमित्येकाग्र उक्त्वा अथ अन्यन्नाम प्रब्रूते । सोऽबिभेत् । तस्मादेकाकी बिभेति । स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति, तस्मान्नु बिभेमीति । तत एवास्य भयं वीयाय । द्वितीयाद्वै भयं भवति । स वै नैव रेमे, तस्मादेकाकी न रमते । स द्वितीयमैच्छत् ।"[१] इत्यादि । अत्र अन्यत्र च आन्तरप्रपञ्चे पुरुषै: अनुभूयमानान् अनुभवान् आश्रित्य मूलकारणविषयेऽपि तेऽनुभवा: तै: स्वीकृता: इति वक्तुं शक्नुम: । एवञ्च उपनिषदृषीणां दृष्टि: न बाह्यप्रपञ्चपरिशीलनाधारेण आन्तरप्रपञ्च-परिशीलनार्थं प्रावर्तत किन्तु तद्विपरीततया ।

३.९.५ अत एव अवस्थात्रयपरिशीलनया यथा आत्मन: स्वरूपं स्वप्रकाश-चिन्मात्र-मद्वितीयं निर्धर्मकम् इत्यायातं; तद्वत् जगन्मूलकारणभूतं वस्त्वपि स्व-प्रकाश-चिन्मात्र-मद्वितीयं निर्धर्मकमेवेति निर्णीतवान् उपनिषदृषि: । अत एव "तज्जलान्" इति; "यतो वा इमानि भूतानि जायन्ते" इत्यादि; "सत्यं ज्ञानमनन्तं ब्रह्म" इति च ब्रह्मण: लक्षणं निर्वक्ति । निर्धर्मकत्वाच्च, "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" इति प्रतिपादयति । एवम् आन्तरस्य बाह्यस्य च प्रपञ्चस्य मूलकारणं तावत् एकम्, अद्वितीयम्, निर्धर्मकं, स्वप्रकाश-चिन्मात्रं वस्त्विति सिद्धम् ।

३.९.६ एवम् उभयप्रपञ्चयो: परीक्षणेन सिद्धं यत् फलम् एकरूपं, तदनुसारमेव सर्वत्र उभयोरपि अनयो: अभेददर्शनम् उपदिशति । "स य एषोऽणिमा, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि श्वेतकेतो !"[२] इति छान्दोग्ये ।

एवंप्रकारेण बाह्यस्य प्रपञ्चस्य सृष्टिप्रलयपरीक्षणं यत् उपनिषत्सु भूयो भूय: महता ग्रन्थेन कृतं, तत् आन्तरप्रपञ्चपरिशोधनसिद्धम् आत्मन: अद्वैतत्वं स्थिरीकर्तुम् उपष्टम्भयितुमेव इति विभावनीयम् ।

---

१. ऐ० उ० १.४.१-४

२. छां० उ० ६.८.७

Digitization by Arya Samaj Charitable Foundation, Chennai

३.१० पारमार्थिकं सत्यम्

"किं तावत् पारमार्थिकं सत्यम्" इति प्रश्नः इदानीं समाधेयो भवति। तत्र उपनिषत्सु परस्परविरुद्धानीव भासमानानि बहूनि मतानि एतस्मिन् विषये प्रतिपादितानि। किमेषां मतानाम् एकवाक्यता सम्भवति? इति प्रश्ने, सम्भवति इत्येव वयं विभावयामः। उपनिषदृषीणां मते "आत्मा" एव पारमार्थिकं सत्यम्। तदपेक्षया बाह्यमान्तरं च इदं जगत्, तस्य च जगतः उत्पादयिता रक्षिता संहर्ता च य ईश्वरः, उभावपि तौ अप्रधानौ गुणीभूतावेव। यद्यपि उपनिषदृषिः बाह्यप्रपञ्चस्य अतिविस्तृतं परीक्षणं करोति तथापि पारमार्थिकं सत्यं किम् इति प्रश्नं समाधातुं ते सर्वदा आत्मानमेव आश्रयन्ते। तथाहि।

३.१०.१ उपकोसलविद्यायां छान्दोग्ये श्रूयते—, "अथ हैनं गार्हपत्योनुशशास पृथिव्यग्निरन्नमादित्य इति। य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि; स एवाहमस्मीति।...। अथ हैनमन्वाहार्यपचनोऽनुशशास, आपो दिशो नक्षत्राणि चन्द्रमा इति। य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि, स एवाहमस्मीति।...। अथ हैनमाहवनीयोऽनुशशास; प्राण आकाशो द्यौः विद्युदिति। य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि; स एवाहमस्मीति।...। ते होचुः उपकोसल एषा तेऽस्मद्विद्या आत्मविद्या च। आचार्यस्तु ते गतिं वक्ता इति; आजगाम हास्याचार्यः। तमाचार्योऽभ्युवाच उपकोसल ३ इति। भगव इतिह प्रतिशुश्राव। ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशास।...। य एषोऽक्षिणि पुरुषो दृश्यते, एष आत्मेति होवाच। एतदमृतमभयमेतत् ब्रह्म इति।"[१] इति।

अत्र आदित्ये यःपुरुषः, चन्द्रमसि यः पुरुषः, विद्युति यःपुरुषः स एव आत्मा, इति अग्न्युपदेशं प्रत्याख्याय अक्षिण यः पुरुषः स एव आत्मा इति आचार्यानुशासनम् एतत् स्थिरीकरोति यत् आन्तरः आत्मैव सत्यम् इति।

३.१०.२ एवमेवान्यत्रापि "अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतःपृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषु उत्तमेषु लोकेषु इदं वाव तत् यदिदमस्मिन्नन्तः पुरुषे

१. छां० उ० ४.१०.१५

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्योतिः"[१] इति । अत्रापि बहिर्विद्यमानस्य ज्योतिषः आन्तरेण ज्योतिषा अभेदोपदेशः क्रियते ।

३.१०.३ अजातशत्रुब्राह्मणे च बृहदारण्यके बालाकिना प्रतिपदितम् आदित्यादिषु विद्यमानस्य पुरुषस्य आत्मत्वेनोपासनं प्रत्याख्याय "स यथोर्णनाभिः तन्तुनोच्चरेत्, यथाग्नेः क्षुद्राः विस्फुलिङ्गाः व्युच्चरन्ति एवमेवास्मात् आत्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति, तस्योपनिषत्, सत्यस्य सत्यमिति, प्राणा वै सत्यं तेषामेष सत्यम्[२] ।" इत्यादिना आत्मनः एव पारमार्थिकं सत्यत्वं प्रतिष्ठापयामास अजातशत्रुः ।

३.१०.४ एवं छान्दोग्ये, "न्यग्रोधफलमाहरेति । इदं भगव इति । भिन्दीति । भिन्नं भगव इति । किमत्र पश्यसीति । अण्व्य इवेमा धाना भगव इति । आसामङ्ग एकां भिन्धीति । भिन्ना भगव इति । किमत्र पश्यसीति । न किञ्चन भगव इति । तं होवाच यं वै सोम्य एतमणिमानं न निभालयसे, एतस्य वै सोम्य एषोऽणिम्नः एवं महान्यग्रोधः तिष्ठति । श्रद्धत्स्व सोम्येति । स य एषोऽणिमा, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि श्वेतकेतो[३] इति ।" इति श्रूयते । अत्र न्यग्रोधबीजादिषु बाह्यप्रपञ्चे सर्वत्र सूक्ष्मतया विद्यमानं ब्रह्मैव आन्तरेण आत्मना अभेदेन उपदिष्टः । एतेन आन्तरे बाह्ये च प्रपञ्चे सूक्ष्मतया अनुवर्तमानं वस्त्वेकमिति, तदेव च आत्मेति च सुष्ठु, प्रतिपादितं भवति ।

३.१०.५ एवं बृहदारण्यके "कति देवाः"? इति देवताविषयकं विचारम् आरभ्य, "त्रयश्च त्री शता, त्रयश्च त्री च सहस्रा, "इतयुक्त्वा, संख्यामिमाम् एकपर्यन्तं नीत्वा, तस्य चैकस्य देवस्य आन्तरेण अभेदम् उपदिशति याज्ञवल्क्यः ।" अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति । त्रयश्च त्री च शता, त्रयश्च त्री च ओमिति होवाच । कत्येव देवा याज्ञवल्क्य इति । त्रयस्त्रिंशदिति, ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति, षडिति, ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति;

१. छां० उ० ३.१३

२. बृ० उ० २.१.२०

३. छां० उ० ६.१२

Digitization by Arya Samaj Charitable Foundation, Chennai

त्रय इति; ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । द्वाविति, ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति, अध्यर्ध इति, ओमिति हो वाच । कत्येव देवा याज्ञवलक्येति, एक इति, ओमिति होवाच ।.... कतम एको देव इति.... पृथिव्येव यस्यायतनं अग्निर्लोकः, मनो ज्योतिः, यो वै तं पुरुषं विद्यात्, सर्वस्यात्मनःपरायणं, स वै वेदिता स्यात् याज्ञवल्क्य, वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणम्[१] ।" इति ।

३.१०.६ श्वेताश्वतरेऽपि एकस्य देवस्य रुद्रस्योपवर्णनं, तस्य च आत्मनश्च अभेददर्शनं स्पष्टतरमुपपादितम् ।

"एको हि रुद्रो न द्वितीयाय तस्थुः य इमांल्लोकानीशत ईशनीभिः ।
प्रत्यङ् जनास्तिष्ठति संचुकोपान्तकाले संसृज्य विश्वा भुवनानि गोपा ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् ।
स बाहुभ्यां धमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः[२] ॥"
"स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥
येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः ।
तेनेशितं कर्म विवर्तते ह पृथिव्यप्तेजोऽनिलखानि चिन्त्यम् ॥"
———
"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिः विवधैव श्रूयते स्वभावकी ज्ञानबलक्रिया च ॥
न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥"
"एको वशी निष्क्रियाणां बहूनाम् एकं बीजं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां सुखं शाश्वतं नेतरेषाम् ॥"[३]

---

१. बृ० उ० ३.९.१-१०

२. श्वे० उ० ३.२.३

३. तत्रैव० ६.१-१२

Digitization by Arya Samaj Charitable Foundation, Chennai

३.१०.७ ईश्वरस्य तावत् शरीरात् बहिः विश्वं व्याप्य स्थितिः, शरीरात् अन्तः सूक्ष्मरूपेण स्थितिः च उपनिषत्सु उपवर्णिता। किन्तु पक्षद्वयेऽपि तस्य आत्मना सह अभेदस्तु स्पष्टतरमुपपादितः अस्ति। तथाहि। श्वेताश्वतरे—"यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमः[१]।" इति बाह्ये सर्वस्मिन् प्रपञ्चे ईश्वरस्य सद्भावः अभिहितः। बृहदारण्यके तु तस्य अस्मदादिशरीरेषु आनखाग्रं प्रवेशः अभिहितः। "स एष इह प्रविष्टः आनखाग्रेभ्यः यथा क्षुरः क्षुरधाने अवहितः स्यात्, विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्ति[२]।" इति। अत्र यथा खङ्गः स्वे कोशे पूर्णरूपेण प्रविष्टः बर्हिर्नोपलक्ष्यते, यथा वा पक्षी स्वे कुलाये प्रविष्टो नोपलक्ष्यते एवमीश्वरः देहेऽस्मिन् प्रविष्टः इति उपवर्णितम्। छान्दोग्ये पुनः लवणोदकदृष्टान्तेन अपरिदृश्यमानस्य ईश्वरस्य सर्वत्र व्याप्य विद्यमानत्वं प्रदर्श्य, तस्य आत्मना सह अभेदः कण्ठतः प्रदर्शितः। तथाहि। "लवणमेतदुदकेऽवधाय मा प्रातः उपसीदथाः इति। स ह तथा चकार। तं होवाच, यत् दोषा लवणमुदकेऽवाधाः अङ्ग तदाहरेति। तद्धावमृश्य न विवेद, यथा विलीनमेव। अङ्ग! अस्य अन्तादाचामेति। कथमिति? लवणमिति। मध्यादाचामेति। कथमिति? लवणमिति। अन्तादाचामेति। कथमिति? लवणमिति। अभिप्राश्यैनदथ मोपसीदथा इति। तद्ध तथा चकार। तच्छश्वत्संवर्तते। तं होवाचात्र वाव किल सत्सोम्य न निभालयसे अत्रैव किलेति। स य एषोऽणिमा....तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो[३]।" इति।

३.१०.८ कठोपनिषद्यपि प्रतिपादितं यत् सर्वत्र व्याप्य विद्यमानस्यापि आत्मनः तत्तत्पदार्थगतदोषैः सम्पर्को न भवति इति सूर्यदृष्टान्तेन प्रतिष्ठापितं दृश्यते।

"सूर्यो यथा सर्वलोकस्य चक्षुः न लिप्यते चाक्षुषैः बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः[४]॥

---

१. तत्रैव। २.१७
२. बृ० उ० १.४.७
३. छां० उ० ६.१३.१-३
४. क० उ० २.५.११

Digitization by Arya Samaj Charitable Foundation, Chennai

"अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ॥
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च[१] ॥" इति ।

३.१०.९ स्पष्टतमं चाभिहितं केनोपनिषदि यत् चक्षुरादीनां वागादीनां च प्रवर्तकं चैतन्यमेव ब्रह्मेति, आत्मा च ब्रह्मणः अभिन्नः इति । तथाहि । "श्रोत्रस्य श्रोत्रं मनसो मनो यत् वाचो ह वाचं स उ प्रणस्य प्राणः । चक्षुषश्चक्षुः अतिमुच्य धीराः प्रेत्यास्माल्लोकात् अमृता भवन्ति ।... ॥ यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते । यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यत्प्राणेन न प्रणिति येन प्राणः प्रणीयते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते[२] ।"

३.१०.१० छान्दोग्ये पुनः देवासुराख्यायिकामाध्यमेन अवस्थात्रये अनुस्यूततया भासमानस्य चैतन्यस्य अवस्थात्रयबहिर्भूतत्वम्, आन्तरत्वं च प्रजापतेः उपदेशद्वारा सम्यगुपपादितं वर्तते। आत्मनश्च स्वप्रकाशचिन्मात्ररूपस्य ब्रह्मणः अभिनत्वं चात्र उपपादितम् । तथाहि । "तद्धोभये देवासुराः अनुबुबुधिरे...इन्द्रो हैव देवानामभि प्रवव्राज; विरोचनोऽसुराणाम्; तौ...समित्पाणी प्रजापतिसकाशमाजग्मतुः ।...तौ ह प्रजापतिरुवाच, य एषोक्षिणि पुरुषो दृश्यते एष आत्मा इति होवाच...योऽयं भगवः अप्सु परिख्यायते यश्चायमादर्शे ।... ।तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा उदशरवे अवेक्षयाञ्चक्राते...एष आत्मेति होवाच, एतदमृतम्, एतदभयम्, एतत् ब्रह्मेति । तौ ह शान्तहृदयौ प्रवव्रजतुः ।... । शान्तहृदय एव विरोचनः असुरानाजगाम ।... । अथ हेन्द्रः अप्राप्यैव देवान् एतद्भयं ददर्श; यथैव खलु अयमस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति, सुवसने सुवसनः, परिष्कृते परिष्कृतः, एवमेवायम् अस्मिन्नन्धे अन्धो भवति, स्रामे स्रामः, परिवृक्णे

१. तत्रैव । २.५.९-१०
२. केन० उ० १.२-८

Digitization by Arya Samaj Charitable Foundation, Chennai

परिवृक्ण:...नाहमत्र भोग्यं पश्यामि इति, स समित्पाणि: पुनरेयाय ।... । तस्मै होवाच । य एष स्वप्ने महीयमान: चरति, एष आत्मेति होवाच, एतदमृतम्, अभयम्, एतद्ब्रह्मेति । स ह शान्तहृदय: प्रवव्राज । स ह अप्राप्यैव देवान् एतद्भयं ददर्श...अप्रियवेत्तेव भवति, अपि रोदितीव, नाहमत्र भोग्यं पश्यामीति; समित्पाणि: पुनरेयाय ।... । तस्मै होवाच । नद्यत्रैतत् सुप्त: सम्प्रसन्न: स्वप्नं न विजानाति; एष आत्मेति होवाच... । स ह शान्तहृदय: प्रवव्राज । स ह अप्राप्यैव देवान् एतद्भयं ददर्श । न खलु अयमेवं सम्प्रत्यात्मानं जानाति, अयमहमस्मीति, नो एव इमानि भूतानि, विनाशमेवापीतो भवति, नाहमत्र भोग्यं पश्यामीति; स समित्पाणि: पुनरेयाय ।... । तस्मै होवाच । मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना । तदस्य अमृतस्य अशरीरस्य आत्मनोऽधिष्ठानम् । आत्तो वै सशरीर: प्रियाप्रियाभ्यां; न वै सशरीरस्य सत: प्रियाप्रिययो: अपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत: । अशरीरो वायु: अभ्रं विद्युत् स्तनयित्नु: अशरीराण्येतानि; तद्यथा एतान्यमुष्मात् आकाशात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन स्वेन रूपेण अभिनिष्पद्यन्ते, एवमेवैष: सम्प्रसाद: अस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेण अभिनिष्पद्यते; स उत्तम: पुरुष:[१] ।" इति ।

३.१०.११. या च उदाहृतपूर्वा ऐतरेयश्रुति:, सा आन्तरस्य बाह्यस्य च सर्वस्य प्रपञ्चस्य, देवतिर्यङ्मनुष्यस्थावरादीनां च सर्वेषां प्राणिनां प्रज्ञानस्वरूपत्वं युक्त्या उपपाद्य, प्रज्ञानस्य ब्रह्मत्वात् ब्रह्मरूपत्वम् उपदिशति । तथाहि । "एष ब्रह्मा एष इन्द्र:...एते सर्वे देवा:, इमानि च पञ्चमहाभूतानि...अण्डजानि च जारुजानि च स्वेदजानि च उद्भिज्जानि ।... । यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरम् । सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं, प्रज्ञानेत्रो लोक:, प्रज्ञा प्रतिष्ठा, प्रज्ञानं ब्रह्म[२] ।" इति ।

३.१०.१२ तैत्तिरीयश्रुतिरपि ब्रह्मण: हृदयगुहायां विद्यमानत्वं कण्ठत: उपदिशति—"सत्यं ज्ञानमनन्तं ब्रह्म; यो वेद निहितं गुहायां परमे व्योमन्[३] ।" इति ।

---

१. छां० उ० ८.७-१२

२. ऐ० उ० ३.३

३. तै० उ० २.१

Digitization by Arya Samaj Charitable Foundation, Chennai

३.११. आत्मनः स्वप्रकाशत्वम्

तस्य चास्य ब्रह्मणः अव्यतिरिक्तस्य आत्मनः अवेद्यत्वरूपं स्वप्रकाशत्वं बृहदारण्यकश्रुतिः भूयो भूयः कण्ठरवेण युक्तिभिः उपपादयति। "येनेदं सर्वं विजानाति तं केन विजानीयात्। विज्ञातारमरे केन विजानीयात् इति[१]।" "न दृष्टेः द्रष्टारं पश्येः, न श्रुतेः श्रोतारं शृणुयाः, न मतेः मन्तारं मन्वीथाः, न विज्ञातेः विज्ञातारं विजानीयाः[२]।" "अदृष्टो द्रष्टा, अश्रुतः श्रोता, अमतो मन्ता, अविज्ञातो विज्ञाता, नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता[३]।" "याज्ञवल्क्य ! किं ज्योतिरयं पुरुषः इति ? आदित्यज्योतिः सम्राड् ! इति होवाच। आदित्येनैवायं ज्योतिषास्ते, पल्ययते, कर्म कुरुते, विपल्येति इति, एवमेवैतत्। याज्ञवल्क्य ! अस्तमिते आदित्ये याज्ञवल्क्य किं ज्योतिरेवायं पुरुषः इति ? चन्द्रमा एवास्य ज्योतिः भवति इति...। अस्तमिते आदित्ये याज्ञवल्क्य ! चन्द्रमस्यस्तमिते किं ज्योतिरेवायं पुरुष इति ? अग्निरेवास्य ज्योतिर्भवतीति...। अस्तमिते आदित्ये, याज्ञवल्क्य ! चन्द्रमस्यस्तमिते, शान्तेऽग्नौ, किं ज्योतिरेवायं पुरुषः इति ? आत्मैवास्य ज्योतिर्भवतीति[४]।" इति

एवम् उपनिषदः सर्वाः अपि ब्रह्मणः अव्यतिरिक्तस्य आत्मनः एव पारमार्थिकसत्यत्वम् अङ्गीकुर्वन्ति इति सिद्धम्। अत एव तद्विषयकविचारात्मकस्य दर्शनस्य **"शारीरकमीमांसा"** इति यन्नाम तत् उपपन्नं भवतीति वयं विभावयामः।

३.१२. माया

तस्य चैतस्य अद्वितीयस्य स्वप्रकाशचिन्मात्ररूपस्य आत्मनः, चिज्जडोभयात्मना परिदृश्यमानं यत् जगत् तदात्मना विपरिणामस्य व्याख्यातव्यत्वात्, तदर्थं त्रिगुणात्मिका जडा "माया" अविद्या-मृत्यु-अनृत-इत्यपराभिधाना अङ्गीकृता स्वीकृता च उपनिषदृषिणा। तथाहि। "दूरमेते विपरीते विषूची अविद्या या च विद्येति

---

१. बृ० उ० २.४.१४

२. तत्रैव, ३.४.२

३. तत्रैव, ३.७.२३

४. तत्रैव, ४.३.२-६

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञाता। अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः। दंद्रम्यमाणाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः[१]।"

"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्[२]।"

"तद्यथा हि हिरण्यनिधिं निहितम् अक्षेत्रज्ञा उपर्युपरि सञ्चरन्तः न विन्देयुः; एवमेवेमाः सर्वाः प्रजाः अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ति; अनृतेन हि प्रत्यूढाः"[३] "रूपं रूपं प्रतिरूपो बभूव यदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश[४]।" "तेषामसौ विरजो ब्रह्मलोको न येषु जिह्मम् अनृतं न माया चेति[५]।"

"तस्याभिध्यानात् योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः[६]।"

"मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्[७]।"

"अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः[८]।"

अत एव त्रिकालाबाध्यत्वरूपं पारमार्थिकसत्यत्वं ब्रह्मणः अव्यतिरिक्तस्य अद्वितीयस्य स्वप्रकाशचिन्मात्ररूपस्य आत्मनः एकस्यैव; तदितरस्य सर्वस्य जगतः ब्रह्मज्ञानेतराबाध्यत्वरूपं व्यावहारिकं सत्यत्वमेव; न तु पारमार्थिकं सत्यत्वम्, इति अद्वैतिनां सिद्धान्तः प्रदर्शितया रीत्या श्रुति-युक्ति-सिद्धो राराजते।

---

१. क० उ० १.२.४-५

२. छां० उ० ६.१.४

३. तत्रैव,८.३.१-३

४. बृ० उ० २.५.१९

५. प्र० उ० १.१६

६. श्वे० उ० १.१०

७. तत्रैव,४.१०

८. तत्रैव,४.९

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थाध्यायः

शिवमौपनिषदमद्वैतम्

एवम् अध्यायद्वयप्रदर्शितक्रमेण उपनिषदृषयः प्रत्यक्षदृष्टाभिः युक्तिभिः बाह्यस्य आन्तरस्य च प्रपञ्चद्वयस्य परीक्षां यां कृतवन्तः सा परीक्षा "शोधनम्" इत्यपि शास्त्र-ग्रन्थेषु उच्यते। एवं शोधितस्य प्रपञ्चद्वयस्य स्वं यत् रूपं अद्वितीय-शुद्ध-स्वप्रकाश-चिन्मात्रात्मकं, तेन रूपेण आन्तरप्रपञ्चाधिष्ठातुः जीवस्य, बाह्यप्रपञ्चाधिष्ठातुः ब्रह्मणश्च अभेदं प्रत्यक्षतोऽनुभूय सर्वास्वपि उपनिषत्सु स्पष्टं तत् शब्दतः प्रतिपादयामासुः उपनिषदृषयः; ये च शब्दाः महावाक्यानि इत्युच्यन्ते। तादृशेषु महावाक्येषु छान्दोग्यषष्ठे प्रतिपादितं "तत् त्वम् असि" इत्येतत् महावाक्यं, नवकृत्वः उपदिष्टं सत् सर्वाण्यन्यानि महावाक्यान्यतिशेते।

किञ्च, "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥" इति तात्पर्यनिर्णायकत्वेन सम्मतानां षण्णामपि लिङ्गानां स्पष्टरूपेण अत्र सद्भावः महावाक्यस्यास्य उत्कृष्टतां; छान्दोग्योपनिषदश्च अद्वितीय-शुद्ध-स्वप्रकाश-चिन्मात्र-ब्रह्मबोधने तात्पर्यं च स्पष्टीकरोति। तथाहि।

छान्दोग्ये षष्ठे अध्याये षोडशखण्डात्मके आदौ द्वितीयखण्डे "सदेव सोम्येदमग्र आसीत् एकमेवद्वितीयम्" इति अद्वितीयस्य सत्पदार्थस्य परामर्शात्, अन्ते च "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति तस्यैव सत्पदार्थस्य परामर्शात् उपक्रमोपसंहारयोः एकरूपतारूपस्य तात्पर्यलिङ्गस्य निर्वाहः। अष्टमखण्डमारभ्य षोडशखण्डपर्यन्तं प्रतिखण्डं "तत्त्वमसि" इति अभेदबोधकस्य महावाक्यस्य नवकृत्वः आवृत्त्या अभ्यासरूपस्य तात्पर्यलिङ्गस्य निर्वाहः। जीव-

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मणोः अभेदरूपस्य तत्त्वस्य महावाक्येतरप्रमाणान्तरग्राह्यत्वाभावात् अपूर्वतारूपस्य तात्पर्यलिङ्गस्य निर्वाहः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति वाक्यप्रतिपादितः मोक्षः एव फलम् इति फलरूपतात्पर्यलिङ्गस्य निर्वाहः । द्वितीयखण्डे प्रतिपादिता तेजोबन्नानां सृष्टिः, अष्टमे खण्डे तेजोबन्नानां सदायतनत्वप्रतिपादनं, तत्रैव च तेजोबन्नानां सत्पदार्थे प्रतिपादितः अप्ययः, तृतीयखण्डे प्रतिपादितः सतः तेजोबन्नेषु प्रवेशः, अष्टमखण्डे प्रतिपादितं सतः तेजोबन्नानां नियन्त्रणम् इत्येते पञ्च अर्थवादाः इति अर्थवादरूपतात्पर्यलिङ्गसद्भावस्य निर्वाहः । अष्टमखण्डादारभ्य षोडशखण्डपर्यन्तं प्रतिखण्डं प्रतिपादिताः दृष्टान्ताः उपपत्तिरूपाः इत्यतः उपपत्तिरूप-तात्पर्यलिङ्गसद्भावस्य निर्वाहः भवति ।

एवं छान्दोग्यषष्ठे षण्णामपि तात्पर्यलिङ्गानां सद्भावदर्शनात् निर्गुणब्रह्मबोधनपरस्यास्य अध्यायस्य तात्पर्यं जीवब्रह्मणोः अभेदबोधने एवेति गम्यते । एवम् उपनिषदन्तरेषु महावाक्यानि तात्पर्यलिङ्गानि च यथासम्भवम् ऊह्यानि । शास्त्रग्रन्थेषु तत्र तत्र एतानि प्रदर्शितानि ।

४.१ उपसंहारः

उपनिषत्सु अपरीक्ष्य कृतः कोऽपि विचारः नास्त्येव । परीक्षा च सर्वत्र युक्त्या उपष्टम्भितैव । किन्तु एताः युक्तयः न बुद्धिशक्तिमात्रेण ऋषिभिः प्रतिपादिताः; किन्तु तैः साक्षात्प्रत्यक्षतो दृष्टाः अनुभूताश्च । बाह्यस्य आभ्यन्तरस्य च जगतः परीक्षणेन शोधनेन च सिद्धं यत् निर्धर्मकचिन्मात्ररूपत्वं मूलकारणस्य तेन रूपेण जीवब्रह्मणोः अभेदबोधने एव सर्वासामुपनिषदां तात्पर्यम् । उभयप्रपञ्चपरीक्षणावसरे ऋषिभिः आविष्कृतानि बहूनि तथ्यानि अद्यतनविज्ञानेनापि समर्थितानि भवन्ति इति विषयः आश्चर्यमेवोपजनयति । न केवलं ब्रह्म च परलोकश्च, किन्तु शारीरश्च इहलोकश्च बहुधा प्रपञ्चितः एतासूपनिषत्सु । नैकविध-सत्प्रवृत्ति-सदाचारादीनां प्रतिपादिकाः एताः उपनिषदः क्रिस्तोः पूर्वं सहस्रवर्षेभ्यः प्राक् भारते देशे भारतीयैः आधिभौतिक-आध्यात्मिक-आधिवैद्यक-क्षेत्रेषु आरूढानां महोन्नतशिखराणां प्रमाणयित्र्यः सत्यः; सर्वातिशायिनः कस्यचन ऐहिका-मुष्मिक-समन्वयात्मक-जीवनविधानस्य सद्भावं प्रतिष्ठापयन्त्यः; तदीयैः सार्वकालीनैः विचारैः सर्वेष्वपि कालेषु सङ्गताः प्रमाणिताश्च विराजन्ते इति शम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

Bibliography

संक्षिप्ता-उपयुक्तग्रन्थसूची

DEUSSEN, PAUL. The Philosophy of the Upaniṣads, Dover Publications, Inc., New York, 1966.

NAKAMURA, HAJIME., A History of Early Vedanta Philosophy, Motilal Benarsidass, Delhi, 1990.

RADHAKRISHNAN, Dr. S., The Principal Upaniṣads, Horper Collins Publishers India, New Delhi, 1994.

—Indian Philosophy, Vol I, Oxford University Press, Bombey, 1989.

RANADE, R. D., A Construetive Survey of Upanishadic Philosophy, Bharatiya Vidya Bhavan, Bombay, 1986.

SASTRY, S. SUBRAHMANYA, Upaniṣad-bhāṣyam, Mahesh Research Institute, Varanasi, Vol I, 1979, Vol II, 1982, Vol III 1986.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Sri Sankar

Sri Sankar

2418

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

डॉ॰ वी॰ कुटुम्बशास्त्री पाण्डिचेरीविश्वविद्यालये संस्कृतविभागस्याध्यक्ष आचार्यश्च आन्ध्रप्रदेशस्य कृष्णामण्डलान्तर्गते गुदलावल्लेरुनामनि ग्रामे १९५०तमे ख्रिष्टाब्दे लब्धजन्मा प्राच्यप्रतीच्योभयविधशिक्षयोर्दीक्षितः वेदवेदान्तादिदर्शनितिहासाङ्ग्लसाहित्यादिविद्यासु कृतभूरिपरिश्रमः विविधविश्वविद्यालयेषु राष्ट्रियान्ताराष्ट्रियगोष्ठीसु सप्रतिभैर्व्याख्यानैर्लब्धकीर्तिः विंशत्यधिकशोधनिबन्धानां निबन्धोदीयमानविदुषां पङ्क्तावग्रगण्यो विद्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

राष्ट्रिय-संस्कृत-संस्थानम्
ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)